



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 14-12-2014 | **Typing started on** | **H K Srinivasa Rao** |
| 2 | 21-12-2014 | **Typing Ended on** | **H K SrinivaSa RAo** |
| 3 | 26/12/2014 | **I Proof Reading & Correction** | **H K Srinivasa Rao and M S Venugopal** |

॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Vadirajaguru Sarwabhowmaru. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, , 8095551774 9901971176, Email :* **srkarc@gmail.com**

ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ. ಗ್ರಂಥ

**ಋಣ:**

**1. ಮೋತಿಲಾಲ್ ಬನಾರಸಿ ದಾಸ್ ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ನ್ಯಾಯರತ್ನಾವಳಿ-1978. (ಪ್ರಥಮ ಮತ್ತು ದ್ವಿತೀಯ ಸರಃ)**

**2. (ತೃತೀಯ, ಚತುರ್ಥಃ ಮತ್ತು ಪಂಚಮ ಸರಃ) – ಪ್ರಭಾಕರ ಮುದ್ರಣಾಲಯ – ಉಡುಪಿ ಇವರಿಂದ ಪ್ರಕಾಶಿತವಾದ ನ್ಯಾಯರತ್ನಾವಳಿ (ಪಡು ಮುನ್ನೂರು ನಾರಾಯಣಾಚಾರ್ಯ ವಿರಚಿತ ಪ್ರಕಾಶ ಸಂಗ್ರಹಯುಕ್ತ).**

TABLEOFCONTENTS

॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ॥ ........ 2

ಕೃತಜ್ಞತೆಗಳು........ 2

न्यायमुक्तावळि ॥5-901॥ ........ 4

प्रथमः सरः ॥1-421॥ ........ 4

द्वितीयः सरः ॥2-129॥ ........ 51

तृतीयः सरः ॥3-119॥ ........ 65

चतुर्थः सरः ॥4-132॥ ........ 78

पञ्चमःसरः ॥5-100॥ ........ 93

## न्यायमुक्तावळि ॥5-901॥

### प्रथमः सरः ॥1-421॥

श्रीलक्ष्मवक्षसे रुक्षनखशिक्षितरक्षसे ।
स्वपक्षरक्षादीक्षाय नृहर्यक्षाय ते नमः ॥1॥

त्रिधामा यस्य हृत्सीम्नि कृतधामा निरन्तरम्।
सुधीश्रियं दिशतु मे समध्वक्षीरसागरः ॥2॥

एष सर्वेष्वर इति सर्वस्यैष वशीति च।
सर्वस्येशान इत्यादौ महिमा श्रूयते हरेः ॥3॥

एष नित्यो ब्राह्मणस्य महिमेत्याह काचन।
सत्यः सो अस्य महिमेत्यस्तौषीत्काचन श्रुतिः ॥4॥

स्वाभाविकी ज्ञानबलक्रिया चेत्यपरा जगौ।
तान्नित्यसत्यमहिमा नित्यं ज्ञानबलक्रियः ॥5॥

भगवान्निगमोद्धर्ता धर्ता मन्दरभूभृतः।
भुवो भर्ता दुष्टदैत्यहर्ता सिद्धो भवत्प्रभुः ॥6॥

स्वकार्याय तमेवेशं येऽर्थयन्ते क्षणे क्षणे।
अतादृशबलज्ञाना ब्रह्मेशानादयः सुराः ॥7॥

तस्यानुवर्तिनश्चेति सिद्धमासीद्विवेकिनाम्।
मात्रापरोऽसि त्वं विष्णो महित्वं नाश्नुवन्ति ते ॥8॥

| |
|---|
| इति श्रुतिश्रुतं विष्णु महाप्रतिमपौरुषम्।<br>नास्ति नारायणसमं न भूतं न भविष्यति॥9॥ |
| स्मृतिरेषा च कृष्णस्य समं कालत्रयेऽपि च।<br>निषेधति ततस्तेन कस्यैक्यं स्याद्विचारय॥10॥ |
| महिमा श्रीपतेः सर्वः स्वभावोऽभूच्छ्रुतेर्बलात्।<br>ग्रन्थस्य तद्भावोऽपि श्रुतिस्मृतिबलादभूत्॥11॥ |
| प्रकृत्यैव च यो नीचो यः प्रकृत्या सदोत्तमः।<br>तयोरैक्यं नैव शक्यं वक्तुं कल्पशतैरपि॥12॥ |
| अतत्वावेदकं सर्व भेदवाक्यमितीरिते।<br>वक्तव्यमद्वितीयत्ववाचा भेदनिषेवने॥13॥ |
| निषिध्यमानभेदस्य स्यात्कथञ्चिदतत्वता।<br>अतत्वावेदकं च स्याद्भेदवाक्यं तदैव हि॥14॥ |
| न चैतद्युज्यते शब्दसामर्थ्यस्य विचारणे।<br>आत्मा जडं न जीवो नेत्याकारा नेति नेति वाक्॥15॥ |
| प्रथमान्तपदोक्तेन ब्रह्मणा सह सर्वथा।<br>नञर्थभूतभेदस्य सामानाधिकरण्यवाक्॥16॥ |
| घटः पटो नेति वाक्ये यथा सर्वैः प्रतीयते।<br>घटः पटनिषेधात्मा तथैवात्रापि धीर्भवेत्॥17॥ |

जगदात्मनि नेत्युक्ते त्वत्यन्ताभाववाग्भवेत्।

आत्मा जगन्नेति वाक्तु भेदवाक् नात्र संशयः॥18॥

त्वया च वाक्यपूर्त्यर्थमध्याहार्यं मयैव न।

योग्यं तु प्रतियोग्यत्र मृग्यते द्विः प्रयोगतः॥19॥

सप्तम्यन्तपदेनोक्ते भूतले नास्ति गौरिति।

निषेधे तु नञर्थस्याधारस्तद्भूतलं भवेत्॥20॥

नैवतद्रूपता तस्येत्याहुश्शब्दार्थवेदिनः।

विलक्षणोक्तेरर्थोऽपि स्यादेवेत्थं विलक्षणः॥21॥

अतस्तवाद्वितीयत्ववाग्द्वितीयं निषेधतु।

अद्वितीयतयाभातं भेदं न ब्रह्मणि क्षिपेत्॥22॥

तद्ब्रह्म तत्त्वरूपं मे ब्रह्मभेदं वदद्वचः।

अतत्वावेदकं नाभूत्किन्त्वभूतत्ववेदकम्॥23॥

द्वितीयं यस्य नेत्युक्त्या नञर्थे ब्रह्मणा सह।

षष्ठ्यर्थभूतसम्बन्धो भासते न त्वभिन्नता॥24॥

अतस्तवाद्वैतमेव द्वतीयमभवद्बलात्।

उपस्थितपरित्यागे कारणाभावतः श्रुतिः॥25॥

द्वितीयमिदमेवादौ निषेधेदिति मे मतिः।

निषिध्यमानद्वैतस्य बोधिका वागियं तव॥26॥

| |
|---|
| अतत्त्ववेदिकैवासीच्छब्दशक्ति विचारणे।<br>नीलमुत्पलमित्युक्ते नीलाभिन्नं यथोत्पलम्॥27॥ |
| ईयते नत्वभेदस्याऽप्यभेदस्तेन बोध्यते।<br>किन्त्वभेदाधारतैवं सर्वं ब्रह्मेति वाच्यपि॥28॥ |
| सर्वाभिन्नब्रह्मबुद्धिर्भवेन्नत्वेकरूपता।<br>अतस्तत्राऽप्येकता न ब्रह्मधर्मतयाश्रुता॥29॥ |
| द्वतीयैवाभवत्ताञ्च निषेधत्यद्वितीयवाक्।<br>अतत्वावेदिका सर्वा वाक् चैवमभवत्तव॥30॥ |
| अतो मिथ्यावादिता च भवतामेव शोभते।<br>एवञ्च भेदवाक्यानि भेदतत्त्वप्रमापनात्॥31॥ |
| विद्वच्छलाध्यानि सत्संसद्योग्यान्यासन्नसंशयः।<br>तत्तत्त्ववादिनामेव युक्ताऽभूत्तत्ववेदिता॥32॥ |
| अनादिकालमारभ्य सर्गे सर्गे दिने दिने।<br>शतशः पण्डितमुखाच्छ्रवणे मननेऽपि चा॥33॥ |
| या भ्रान्तिर्न निवर्तेत यवन्मोक्षं पुनः पुनः।<br>सर्वार्थेषु च सार्वज्ञाद्योगीन्द्रेऽप्यनुवर्तते॥34॥ |
| व्यावहारिकमानानि दद्युर्भ्रान्ति किलेदृशीम्।<br>एवं च सर्वजगतामनिवर्त्य महाभ्रमम्॥35॥ |

| |
|---|
| कुर्वतां वेदशास्त्राणां महावञ्चकता भवेत्।<br>प्रातिभासिकमानं तु किञ्चित्किञ्चित्क्वचित्क्वचित्॥36॥ |
| तदाचिद्भ्रामयेत्तस्य दोषे सत्येव नान्यथा।<br>तत्पामराणामेवैतदपकारि न योगिनाम्॥37॥ |
| महावञ्चकता तस्य ततो नात्यन्त (नीच) तोचिता।<br>भेदभेदिपदार्थानां साधकस्य स्थले स्थले॥38॥ |
| चोदनारूपतः सर्वयागानां बोधकस्य च।<br>वेदादेरुक्तविधया दीर्घभ्रान्तिकरस्य तु॥39॥ |
| व्यावहारिकमानत्ववाचाऽप्यत्यन्तनीचता।<br>आगता न गुणश्रैष्ठ्यमतोऽप्येतदसङ्गतम्॥40॥ |
| व्यवहारस्य निर्वाहकरी या तु दशाखिलैः।<br>सत्यस्यैवोच्यते सैव दशेयं चेद्भवेदपि॥41॥ |
| बाधितार्थत्वसाम्ये तु बाधदूरत्वमात्रतः।<br>नास्या विशेषः कोऽपि स्यात्किन्तु स्यादुक्तदूषणम्॥42॥ |
| रजतार्थी भ्रमे जाते तदैव तदपेक्षया।<br>तत्र गत्वा बाधकं च तत्काले प्रतिपद्यते॥43॥ |
| तदनर्थी भ्रमे जातेऽप्युपेक्ष्य स्वगृहं गतः।<br>बाधं तु नैव जानीते को विशेषस्तयोर्वद॥44॥ |

अनिवर्त्यं महाभ्रान्तिजनकोन्मादरोगवान्।
सर्वोपकारिवेदादेर्हीनादपि च हीनताम्॥ 45 ॥

यो ब्रूते वैदिकच्छद्मी हन्ति मातरमेव सः।
विश्वापकारकरणं तस्य लीलेति मे मतिः॥ 46 ॥

किं च कृष्णः किल ब्रह्मरुद्राद्युत्कृष्टचेतनः।
अपकृष्टाश्चेतनाश्च ब्रह्माद्यास्तत एव यत्॥ 47 ॥

सिद्धास्तज्जीवपरयोर्विरुद्धाऽभूच्चदेव हि।
चिन्मात्रौपाधिकं नीचोच्चत्वं चिन्नाश एव हि॥ 48 ॥

नश्येन्नापरथा तस्मात् नित्या जीवेशयोर्भिदा।
विष्णोः सर्वोत्तमत्वं च चित्स्वभावनिबन्धनम्॥ 49 ॥

निराबाधं च नित्यं च कथं नाभूद्विचार्यतां।
ब्रह्मेशाद्यानतैषीको रामः किल महाबलः॥ 50 ॥

तृणास्त्रेण रिपुं जिग्ये वयं च तदनुव्रताः।
जयेमहि तृणेनैव सदसि प्रतिवादिनः॥ 51 ॥

यद्वस्तत्स्पर्शमात्रेण तृणं च ब्रह्मपूर्वकैः।
नतं बभूव तं देवं को वा देवोऽतिवर्तते॥ 52 ॥

एवञ्च रामदेवस्य जीवात्यन्तविभिन्नताम्।
देवेशत्वं च संसत्सु को वा तेन न साधयेत्॥ 53 ॥

पश्य नामबलं विष्णोस्तद्धि लिङ्गानुशासनम्।
यदीदमवजानासि कुर्येत्तर्हि शिवस्तव॥54॥

त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः।
इति प्रस्तोभितो बालैर्मेने स्वात्मानमच्युतम्॥55॥

कदाचित्पौण्ड्रको नाम काशिराजः प्रतापवान्।
वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत्॥56॥

कत्थनं तदुपाकर्ण्य पौण्ड्रकस्याल्पमेधसः।
उच्चकैरुग्रसेनाद्याः सभ्याः प्रजहसुस्तदा॥57॥

इति भागवते स्पष्टं सोऽहंभावो ह्यनेकधा।
यतो विनिन्दितस्तस्मात्को वा तं भावयेद्बुधः॥58॥

अच्युतोऽहमनन्तोऽहं गोविन्दोऽहं सनातनः।
इति मायावादिनां या भावना नित्यकर्मणि॥59॥

अहमेवाच्युतोऽस्मीति वासुदेवोऽहमित्यपि।
या भावना पौण्ड्रकस्य को विशेषोऽनयोर्वद॥60॥

वचनं किल तज्ज्ञानं बालानां भाषितं किल।
दैत्यः किलाधिकारी च यः कृत्रिमचतुर्भुजः॥61॥

रथस्थहेमगरुडारूढो यश्च पथि व्रजेत्।
अज्ञोऽल्पमेधाः स किल कत्थनं किलतद्वचः॥62॥

| |
|---|
| सभ्यानामपहास्यं चेत्याह निन्दां पदे पदे।<br>यदि तत्वज्ञानमिदं तर्हि निन्दां शुकोऽसकृत्॥63॥ |
| कुतश्चकार योगीन्द्रो महासंसदि योगिनाम्।<br>ज्ञानिनोऽस्य शिरः कस्माच्छ्रुतदेवगृहातिथिः॥64॥ |
| चिच्छेद भगवान्कृष्णः कुपितो दूतवार्तया।<br>शुकस्य सूत्रकारस्य राज्ञो राजसभासदाम्॥65॥ |
| कृष्णस्य चाप्रियं ज्ञानं मिथ्याज्ञानं न संशयः।<br>दासोऽहमिति यज्ज्ञानं तत्त्वज्ञानं तदेव तत्॥66॥ |
| प्रतिकर्मव्यवस्थाया मायिनां हृदयङ्गमा।<br>व्यावहारिकतापक्षं प्रतिक्षिप्य तयैव तु॥67॥ |
| प्रपञ्चपारमार्थ्यं च तयैव प्रतिपाद्य हि।<br>अन्ते तामेव या हन्ति सा कृतिः कैर्नमान्यते॥68॥ |
| यत्तत्द्वस्तुविभ्रान्ताविधिष्ठानं तदेव यः।<br>तत्तद्भ्रम इति प्राह स प्रष्टव्यः सभान्तरे॥69॥ |
| एवं चेच्छुक्तिरूप्ये च शुक्त्यवच्छिन्न चिद्धिया।<br>अधिष्ठानचिदेषैव भ्रमेऽप्यस्तु द्वयी गतिः॥70॥ |
| कस्मात्तं भान्तमित्यस्याः सङ्कोचश्च श्रुतेः कुतः।<br>अधिष्ठानस्य चाविद्यावरणं न हि दूषणम्॥71॥ |

| |
|---|
| विक्षेपशक्तितो भ्रान्तार्थोल्लेखोऽपि न दूषणम्।<br>यद्येवमेव सर्वत्राप्यस्त्वित्यङ्गीकृतं त्वया॥72॥ |
| तांस्तान्भ्रमांस्तु जीवेषु केनोपायेन नेष्यसि।<br>उपाध्युपहितैरंशैस्तैरस्यैक्याप्त्यसम्भवात्॥73॥ |
| यद्घटोपहितोंशोऽसौ वृत्तिग्रस्तोऽपरस्तव।<br>यदि वृत्त्या भ्रमी सोऽपि तर्हि सर्वत्र विभ्रमः॥74॥ |
| (सैवा) सर्वोऽस्तु किमपूर्वैतद्भ्रमकल्पनया फलम्।<br>भान्तं तमनुभातीति श्रुतिः सूर्यं प्रशंसतु॥75॥ |
| न चायमपि पक्षस्ते शोभतेऽक्षार्थसङ्गमात्।<br>भवन्ती घटधीर्यस्माद्घटसत्तामपेक्षते॥76॥ |
| श्रुतियुक्ती समुल्लङ्घ्य भ्रान्तिः सा(न्तिसा)क्ष्येव तत्र चेत्।<br>घटेऽपि तद्वदेवास्तु द्वेधा साध्यं न किञ्चन॥77॥ |
| नचैतदपि युक्तं ते दृश्येवारोपवादिनः।<br>दृश्यानां घटपूर्वाणां यस्साक्ष्यन्तर्बहिर्हिते॥78॥ |
| यदि रूप्यभ्रमादौ च दृष्टं पक्षं त्यजन्निह।<br>अधिष्ठानचितं तत्तद्भ्रान्तिं वदसि तच्च न॥79॥ |
| अधिष्ठानस्यावरकाज्ञानमध्यस्तवस्तुषु।<br>उपादानं तव मते तन्नाशे कारणक्षयात्॥80॥ |

| |
|---|
| वस्तुनाशोऽप्यवश्यं स्याद्घटो नेति धीर्भवेत्।<br>घटोऽस्तीति भ्रमस्त्रीया द्वेधा सा विधवाऽप्यभूत्॥81॥ |
| यद्येवमपि पूर्वेषां मतं रक्षितुमिच्छसि।<br>तथाऽपि तस्य शिक्षैव भवेत्पश्याद्य कौशलम्॥82॥ |
| घटाधिष्ठानचैतन्यं घटारोपस्तदा किल।<br>निवर्तेत यदाऽज्ञानं चैतन्यावरकं स्वतः॥83॥ |
| अज्ञाननाशपक्षेऽस्मिन्कार्यनाशो भवेदिति।<br>प्रागुक्तदोषे सत्येव चान्यो दोषोपि कीर्त्यते॥84॥ |
| दोषरूपे तवाज्ञाने भ्रमकारणतोचिता।<br>न तु भ्रमविरोधित्वरूपदिव्यगुणात्मता॥85॥ |
| किञ्चावरणविक्षेपशक्तिद्वययुतैव या।<br>अविद्याख्यपिशाची सा कथं विद्यागुणं भजेत्॥86॥ |
| तस्मात्स्वप्रतिकर्माख्यदुःस्थावस्थानवस्थधीः।<br>अज्ञानोपादानमतं विसस्मार गुरस्तव॥87॥ |
| प्रमाणाधिष्ठानचितो वैकल्यादावृतत्वतः।<br>अज्ञानाख्येन दोषेण जडाग्रहणमिष्यते॥88॥ |
| न तु दोषान्तरं तत्रेत्याहुस्त्वत्पूर्वसूरयः।<br>अधिष्ठानावरकता जडोपादानताऽपि च॥89॥ |

| |
|---|
| एकंस्यैव यतस्तस्मात्कार्यनाशो भवेद्ध्रुवम्।<br>अतो दोषान्तरस्यापि सम्भवादेव कीर्तनम्॥90॥ |
| अज्ञानस्य निवृत्तिश्च वृत्त्या प्रत्यक्षरूपया।<br>सा निर्दोषार्थसंयोगसापेक्षेति च ते मतम्॥91॥ |
| असन्निकृष्टप्रत्यक्षं रजतादि भ्रमेपरम्।<br>अन्यत्रार्थेन संयुक्तमिन्द्रियं करणं त्विति॥92॥ |
| भित्तिव्यवहितार्थस्याज्ञानात्सर्वस्य सम्मतम्।<br>अर्थे सत्येव संयोगो  दृष्टो नापरथा क्वचित्॥93॥ |
| कस्माद्वा नाक्षिसंयोगि शुक्तिरूप्यं विचारय।<br>एवं चारोपतः पूर्वं विद्यमानं घटादिकम्॥94॥ |
| अनारोपितमेवासीत्तवापि च ममापि च।<br>अभूदनारोपितत्वादबाध्यं च तदात्मवत्॥95॥ |
| व्यावहारिकता तस्मात्कस्य वा स्याद्विचारय।<br>इदानीं बाधितभ्रान्त्या या सत्तोल्लिखिता भवेत्॥96॥ |
| प्रातिभासिकसत्ता सा दीर्घभ्रान्त्यैव ते मते।<br>या सत्तोल्लिख्यते सा हि व्यावहारिकतोच्यते॥97॥ |
| आरोपात्प्राक्तु या सत्ताब्रह्मसत्तोपमैव सा।<br>प्रतिकर्मव्यवस्था या भवद्भिरुररीकृता॥98॥ |

चित्रं सैवाभवत्पश्य प्रत्यर्थिमतसाधिका।

अतः सभायां हास्यं ते मतमासीन्न संशयः॥99॥

व्यासोऽपि भगवानाह द्रोग्धुर्वै परतो भयम्।

विश्वस्मै द्रुह्यतः पश्य स्वत एव भयं तव॥100॥

कैमुत्यात्तद्भयं च स्यात् व्यासेन च निरूपितम्।

चैतन्यं न घटारोपः प्रागर्थं यदपेक्षते॥101॥

वृत्तिस्तुन घटारोपः प्राक्कुयत् साप्यपेक्षते।

अतो द्वेधाऽपि नैवाभूदारोपाद्यं मते तव॥102॥

व्यावहारिकतावादस्तस्माद्देशान्तरं गतः।

घटाधिष्ठानचैतन्ये घटोल्लेखो भवेद्यदि॥103॥

हृदिस्थजीवचैतन्ये व्यवहारस्तदा कुतः।

ऐक्याच्चेत्सर्वजीवानां सदा स्याद्यवहर्तृता॥104॥

अथान्तःकरणे चक्षुःसहायेन बहिर्गते।

केदारान्तस्थजलवदर्थाकारविवेकवान्॥105॥

घटादिवृत्तिरूपेण परिणामो यदा भवेत्।

तदाऽस्याः प्रतिबिम्बः स्याद्देहान्तस्थचितो बलात्॥106॥

सा चिद्घटचितैकत्वमत्या तज्ज्ञानमेव च।

एवं चेदनुमित्यादिज्ञाने तज्ज्ञानता कथम्॥107॥

| |
|---|
| न हीयं प्रक्रिया तत्राऽप्यस्ति युष्मन्मतेऽपि च।<br>परोक्षवृत्त्यैव तत्र यदि स्याज्ज्ञानमात्मनः॥108॥ |
| आवश्यक्या तदाऽत्राऽपि वृत्यैव द्रष्टुता भवेत्।<br>बकबन्धस्य निर्बन्धमिमं व्यर्थं परित्यज॥109॥ |
| भान्तं तमनु भातीति श्रुतिस्त्वत्र यथा न ते।<br>तथाऽत्राऽपि भवेन्नासौ दीप्तिमन्तमुपैतु च॥110॥ |
| अनुसृत्य हि भानन्तु भिन्नयोरेव शोभते।<br>सूर्य्यप्रकरणे चाऽस्मिन्श्रमायान्यकथोद्यमः॥111॥ |
| अस्याञ्च त्रिक्षणस्थायिवृत्तौ चित्प्रिबिम्बता।<br>तस्या नाशक्षणे नष्टा पुनरायात्कथं हृदि॥112॥ |
| किञ्चाऽविद्याविनाशेऽपि कथमेकत्वमेतयोः।<br>यतो वृत्तिघटाख्योपाधिद्वयोपहितौ हि तौ॥113॥ |
| उपाधिभेदे सति तु भेदोऽवश्यं तवैव हि।<br>यदि वृत्तिगता चिच्च घटं पश्येत्स्वशक्तितः॥114॥ |
| तर्ह्यारोपातिरिक्तोऽपि सम्बन्धोऽभूत्तयोर्बलात्।<br>एवं चाबद्धशकलमालाभिः किं प्रयोजनम्॥115॥ |
| आवश्यकी वृत्तिरेव किं न स्यात्तत्तदर्थधीः।<br>तयोः फलबलादेव सम्बन्धोऽप्यस्तु कश्चन॥116॥ |

दृष्टकार्यानुसारेण कस्य कस्य न कल्पना।
अस्वच्छदेहान्तरितचैतन्यं घटसन्निधौ॥117॥

बहिः परिणमद्वृत्तौ कथं स्यात्प्रतिबिम्बितम्।
हस्तेनान्तरितादर्शे यन्मुखप्रतिबिम्बनम्॥118॥

नेक्षते क्वापि कस्यापि तद्देहान्तरितोऽपि न।
न चेद्देहान्तरं श्लिष्यद्देहान्तः संस्थितैव चित्॥119॥

तस्यापरोक्षवृत्तौ च फलिता तद्वदेव हि।
तददृष्टमर्थं जानातु किमबद्धान्तरे भयम्॥120॥

यतोऽन्यद्दर्पणेऽप्यन्यवक्रप्रतिकृतिर्भवेत्।
ततो भिन्नचितोः कैमुत्येन स्यात्प्रतिबिम्बनम्॥121॥

किञ्चाधिष्ठानचैतन्यमन्योन्यात्मकतां घटे।
अध्यस्य तं घटं पश्येन्नोचेत्कुप्येद् गुरुस्तव॥122॥

गौरोऽहमितिवत्तस्माद्घटोऽहमिति धीर्भवेत्।
देहान्तस्थितजीवोऽपि घटोऽहमिति पश्यतु॥123॥

घटं जानाम्यहमिति कस्माद्व्यवहरत्यसौ।
अज्ञानापगमे तत्तदधिष्ठानचितोऽखिलाः॥124॥

तत्तदर्थभ्रमाश्च स्युरज्ञानावरणे च ताः।
नार्थानुल्लिखितुं शक्तास्तच्चानादित एवा ताः॥125॥

| |
|---|
| आवृत्त्य तिष्ठतीत्याहुस्तेषामित्थमभून्मतम्।<br>चैतन्यावरकाज्ञानाविक्षेपाख्याः स्वभावतः ॥ 126 ॥ |
| विरुद्धाकारतो वर्तमानस्यजगतः पुरा।<br>विवर्तो ह्यतदाकारपरिणामात्मकोऽभवत् ॥ 127 ॥ |
| तच्चाधिष्ठानचैतन्यमज्ञानावरणात्तदा।<br>तानर्थान्नोल्लिखेदेव वैकल्येन जडाग्रहम् ॥ 128 ॥ |
| यस्माद्ग्रन्थकृदेवाह प्रतिकर्मव्यवस्थितौ।<br>विषयाणां विवेकाय तन्नाशोऽद्याप्यपेक्षते ॥ 129 ॥ |
| तस्मादविद्यावरणे सति तच्चिन्न तद्भ्रमः।<br>तच्चावरणमज्ञानमुपादानतया चिति ॥ 130 ॥ |
| एवं चाभ्रमसिद्धत्वं सर्वस्य जगतोऽपि च।<br>तदैव सर्वथा वाच्यं ततः सृष्टौ न तद्भ्रमः ॥ 131 ॥ |
| भवन्न्यायबलादेव न भवेत्किं विचारय।<br>अज्ञानोपादानमतादारोपितमतं गतम् ॥ 132 ॥ |
| आरोपशोधने चास्य नोपादानमतं भवेत्।<br>वृत्त्याऽज्ञाननिवृत्तौ हि चित्यारोपो भवेत्तव ॥ 133 ॥ |
| यन्निवृत्तौ च यत्कार्यं सर्वैश्चपरिदृश्यते।<br>तदुपादानतां तस्यको वदेत्कोविदः सुधीः ॥ 134 ॥ |

| |
|---|
| तस्मादविद्याकार्यत्वाद्यासीन्न मृषा जगत्।<br>आरोपितत्वादपि च नासीज्जगदिदं मृषा॥ 135॥ |
| एकं सन्धित्सतस्तस्मादपरं च्यवते तव।<br>ज्ञानातपोऽपि न तपेद् दृढमूलतरोः शिखाम्॥ 136॥ |
| दुर्घटत्वमविद्यायाः केवलं भूषणं न ते।<br>पूर्वोत्तरविरुद्धायास्त्वद्विधायाश्चभूषणम्॥ 137॥ |
| अविद्याकार्यमप्येतद्धवेदाविद्यकं परम्।<br>मृषात्वं तस्यकेन स्यात्किं चाण्डालीशिशुर्मृषा॥ 138॥ |
| नचेदज्ञानसम्बन्धा ब्रह्मापि स्यान्मृषा तव।<br>आरोपाभावतो ब्रह्म सच्चेत्तेनैव सज्जगत्॥ 139॥ |
| अविद्याज्ञाननाश्याच्चेन्नाश्यनाशकताभिधः।<br>विरोधोऽपि तयोर्भूयान्मिथ्यात्वं केन वा भवेत्॥ 140॥ |
| प्रकाशनाश्यतमसा किं मृषात्वमपेक्ष्यते।<br>यत्प्राक्सतो नाश्यतैव दृष्टा घटपटादिके॥ 141॥ |
| तस्मान्नाश्यस्य सत्तैव युक्ता स्यान्न त्वसत्यता।<br>यदारोपं विनैवास्ति न तस्योपायकोटिभिः॥ 142॥ |
| नास्तिताशक्यते वक्तुं नोचेत्स्याद्ब्रह्मनास्तिता।<br>तस्मादबद्धमालाया नान्तोऽस्तिभवतो मते॥ 143॥ |

| |
|---|
| अनुवादोप्यबद्धानां दोषायेत्युपरम्यते।<br>स्पष्टत्वाद् ग्रन्थविस्तारभयाच्चोपरमाम्यहम्॥ 144॥ |
| सोऽहंभावस्यैव निन्दा यतो भागवते कृता।<br>ततोऽपि भेदः शङ्कां तेहुङ्कारेणैव वारयेत्॥ 145॥ |
| दृग्दृश्ययोगायोगेन यद्यध्यासो निगद्यते।<br>तर्ह्यध्यासमते योगाभावेऽपि ज्ञेयतास्ति किम्॥ 146॥ |
| उताध्यासाध्यस्तभाव एव योगो विवक्षितः।<br>आद्ये रूप्यभ्रमे ज्ञेयं रज्जुसर्पादिकं भवेत्॥ 147॥ |
| घटदृश्येव दृश्यःस्यात् पटादिरपि ते मते।<br>यदज्ञानस्य यत्कार्यं तस्य ज्ञानं तदेव चेत्॥ 148॥ |
| तर्हि शुक्तेरपि ज्ञेयं शुक्तिरूप्यं भवेत्तव।<br>अज्ञानं वा कथं ज्ञेयं स्वज्ञानस्य भवेद्वद॥ 149॥ |
| कथं च चरमज्ञाने ज्ञेयत्वं ब्रह्मणो भवेत्।<br>यदज्ञानस्य यत्कार्यं तस्य ज्ञेयं तदेव चेत्॥ 150॥ |
| यदज्ञानस्य यत्कार्यं तस्य ज्ञानं च तद्भवेत्।<br>भूलग्नमृत्तिकाकार्ये घटे भूज्ञेयता भवेत्॥ 151॥ |
| ज्ञानत्वाभावतो नो चेत्तर्हि ज्ञानस्वभावथः।<br>ज्ञेयता च भवेत्काचित्किमनेन प्रयोजनम्॥ 152॥ |

| |
|---|
| अज्ञानस्यस्वभावोऽपिकार्येऽप्यज्ञेयतामपि।<br>तस्मिन्काले क्षिपेदेव न तु तत्र विनिक्षिपेत्॥153॥ |
| वृत्तिस्त्वज्ञानमुच्छिद्य घटादौ ज्ञेयतामपि।<br>बलात्सम्पादयेत्तस्माज्ज्ञानतामपिसाऽर्हति॥154॥ |
| मुखमस्तीति किं ब्रूषे दशहस्तां हरीतकीम्।<br>अज्ञानक्षेपणाशक्ते स्वार्थस्योल्लेखनाक्षमे॥155॥ |
| ज्ञानता यदि चैतन्येघटादौ च कुतो न सा।<br>अज्ञाननाशे त्वन्येन कृते सति तदेव च॥156॥ |
| यदि ज्ञानं भवेत्तर्हि यदज्ञानस्य नाशकम्।<br>तदेव ज्ञानतामर्हेत् ज्ञेयोऽसौ तर्ह्यमुं लिखेत्॥157॥ |
| दीपशक्त्या तमोघ्नस्य किं घटस्यापि दीपता।<br>त्वत्प्राञ्चोऽपि यतः प्राहुर्ज्ञानमज्ञाननाशकम्॥158॥ |
| ज्ञानस्वभावादेवेत्थं ज्ञानं ज्ञेयं निरुच्यताम्।<br>अज्ञानशक्त्या ङेयत्वज्ञानत्वोक्तिस्त्वसङ्गता॥159॥ |
| अतिप्रसङ्गभङ्गाय निर्वाहं चेच्चिकीर्षसि।<br>मायालुप्त्यै तवाप्यावश्यकवृत्तौ स चिन्त्यताम्॥160॥ |
| गृहोपगतशङ्खोदपानायैव मतिं कुरु।<br>दूरे मरीचिकातोयपानायाशा त्वियं वृथा॥161॥ |

| |
|---|
| यदाक्षयोगजा या धीस्तस्या ज्ञेयं तदुच्यताम्।<br>विशेष्यमेव सर्वं च मुख्यं ज्ञेयंविदुर्बुधाः॥162॥ |
| रूप्यत्वेनापि यच्छुक्तिं ज्ञात्वा तत्र प्रवर्तते।<br>रूप्योल्लेखस्तु रूप्यत्वाकारधीयोग्यताभिधात्॥163॥ |
| प्रधानरूप्यसादृश्यादित्याहुः पूर्वसूरयः।<br>तच्च स्वरूपसत्तत्तद्धर्मेषु नियतत्वतः॥164॥ |
| तादृशाकारघटकं प्राग्धीस्तस्य तु नेष्यते।<br>प्रागज्ञातादेव यथा तत्तदिन्द्रिययोगतः॥165॥ |
| तत्तदर्थोल्लेखिनी स्यात्प्रमा तद्वत् भ्रमोऽप्ययम्।<br>यदिच्छादिकरी या धीस्तस्याज्ञेयं तदेव वा॥166॥ |
| यद्वा स्वरूपम्बन्धविशेषः सम्भविष्यति।<br>दृष्टालाभे त्वदृष्टं च कार्यं तत्कलयोत्किल॥167॥ |
| द्वितीयेऽध्यासशब्देन मिथ्याज्ञानमुदीर्यते।<br>तस्य ज्ञानस्य यज्ज्ञेयं तदध्यस्तं विदुर्बुधाः॥168॥ |
| एतावताऽपि ज्ञानत्वं ज्ञेयत्वं चाभवत्परम्।<br>केन वा ज्ञानतैकस्य ज्ञेयतान्यस्य केन वा॥169॥ |
| इति प्रश्नस्य पक्षेऽस्मिन्नपि किं स्यात्तवोत्तरम्।<br>ज्ञानज्ञेयत्वमात्रं तु वृत्तिज्ञाने तु वर्तते॥170॥ |

यदि कश्चित्फलबलात्सम्बन्धस्तत्र कल्प्यते।
सर्वस्य सम्मतायां मे वृत्तावेवास्तु कल्पना॥ 171॥

न चेच्चरमवृत्तौ ते ब्रह्म ज्ञेयं कथं भवेत्।
चक्षुषा घटविज्ञानं ममाभूदिति लौकिकाः॥ 172॥

वदन्ति घटचैतन्ये घटधीत्वप्रथैव न ।
अधिष्ठानोल्लेखशून्या भ्रान्तिः क्वाऽपि न दृश्यते॥ 173॥

स्वावेद्यब्रह्मचैतन्यं कथं विश्वभ्रमो वद।
तद्दृष्टशिशुरक्षार्थं यत्नः सर्वस्य शोभते॥ 174॥

पिचण्डिलवधूगर्भशिशोरर्थे यतेत कः।
अतोऽपि भेदरत्नस्य नास्ति तस्करतो भयम्॥ 175॥

सरस्वत्यास्तटे राजन्नृषयः सत्रमासत।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान्॥ 176॥

तच्छ्रुत्वामुनयः सर्वे विस्मिताश्छिन्नसंशयाः।
भूयांसं श्रद्धधुर्विष्णुं यतः शान्तिर्यतोऽभयम्॥ 177॥

इति स्मृतेः सर्वजीवराशितोऽत्यन्तभिन्नता।
सिद्धा त्रयाणां देवानां तेषां च समतैकता॥ 178॥

नास्त्येव किन्तु तेष्वेको महानस्ति स को भवेत्।
इति प्रश्नकृतां वाक्यकौशलादैक्यवादिनाम्॥ 179॥

समत्वावादिनाञ्चैव गर्भस्रावान्मतं गतम्।
यदि तत्राऽपि सन्देहस्तर्हि तन्निश्चयोद्यमम्॥ 180॥

कुर्युस्तमुल्लङ्घ्य येयं महत्वस्यैव चोदना।
साऽनङीगीकारनिहतं करोत्येव मतद्वयम्॥ 181॥

त्रयाणाञ्च मिथोऽत्यन्तभेदमेकस्य चोच्चताम्।
योग्यस्यर्षिमतत्वञ्च प्रश्नोऽयं साधयत्यहो॥ 182॥

त्रयाणां निकटं गत्वा तत्तत्सामर्थ्यशोधने।
गरीयसी यस्य शक्तिः स एवोच्चो भविष्यति॥ 183॥

इति मत्वा भृगुं शक्तिं प्रत्यक्षेणैव वीक्षितुम्।
सम्प्रेष्य निश्चयस्यान्ते चक्रुः किलमहर्षयः॥ 184॥

स्वसामर्थ्यापरीक्षायै योऽभ्यागात्तन्मनीषितम्।
अज्ञात्वा कुपितौ देवौ ब्रह्मशङ्करनामकौ॥ 185॥

सार्वज्ञाख्यब्रह्मधर्मवैधुर्यान्नीचतोचितौ।
सर्वज्ञाग्रेसरो विष्णुः सर्वदा सर्वहृद्गतम्॥ 186॥

पश्यन्नसह्यमप्यंहः सेहेऽस्य द्रोहिणो मुनेः।
अतः स सर्वजीवोच्चो रुद्राच्च ब्रह्मणोऽपि च॥ 187॥

महानिति विनिश्चित्य तमेव शरणं गताः।
इत्याहोत्तरवाक्यं च तस्मान्मैत्रेयवागपि॥ 188॥

| |
|---|
| विरोधाऽऽख्यभिदामेव त्रयाणां प्रतिषेधति।<br>विस्मर्ता निश्चितस्यास्य तत्वस्य स कथं मुनिः॥189॥ |
| यस्त्वेमं मुनिराद्धान्तं मिथ्यावादं वदेद्बुधः।<br>व्यावहारेकतावाक्या स प्रष्टव्यः सभान्तरे॥190॥ |
| मुनिमार्गमिमं कस्मात्त्यजसीति विवेकिभिः।<br>यद्यैक्यश्रुतिसामर्थ्यत्तद्विरुद्धं जिहीर्षसि॥191॥ |
| तर्हि श्रुतीनां द्रष्टारो वसिष्ठाद्या महर्षयः।<br>नवश्रुतिमिमां केऽपि नाविदन्निति मे मतिः॥192॥ |
| वेदव्यासोऽपि वेदार्थं किं न वेत्ति स सूत्रकृत्।<br>सञ्जग्राह कथामेतां यश्च भागवते प्रभुः॥193॥ |
| वेदश्च वेदव्यासश्च वेदद्रष्टार एव च।<br>यं भावं न क्वचित्प्रोचुस्तं भवान्कथमूचिवान्॥194॥ |
| न हि ते वञ्चकाः शिष्टाः  एन तत्वमिदं तव।<br>न ब्रूयुर्नापि वेत्तारः तत्वस्यास्य महर्षयः॥195॥ |
| कृष्णश्रैष्ठ्यविरोधाप्तौ तद्याञ्चा जनमोहिनी।<br>इत्युत्तरं च तत्रैव किन्नाह भगवान् शुकः॥196॥ |
| किं चासङ्गश्रुतेः सत्वाद्यतो वाच इति श्रुतेः।<br>सत्वाच्च ब्रह्मचिन्मात्रमैक्यं न श्रुतिसङ्गवत्॥197॥ |

तवाखण्डार्थवादस्य सत्वाच्चैक्यश्रुतिर्नहि।
अतः कस्य विरोधेन श्रुतेरर्थं जिहीर्षसि॥198॥

भेदश्रुतिसहायेयं स्मृतिरैक्यमवैदिकम्।
बहिष्कृत्य महर्षीणां मतमेव प्रमापयेत्॥199॥

किं च श्रुतिविरोधस्ते यदि स्याद् व्यावहारिकः।
तदा स्मृतेर्न भीतिः स्यात् स्वार्थं च परमार्थतः॥200॥

वेददेव श्रुतिः सत्यो विरोधो न हि ते मते।
व्यावहारिकभेदो मे यथा ते न भयङ्करः॥201॥

तथा स्मृतेश्च न भयं विरोधाद् व्यावहारिकात्।
यद्ययं परमार्थः स्यात् तर्ह्यैक्यश्रुतिमेव सः॥202॥

विरुणद्धि तदाऽप्यैक्यस्यैवाभावात्समृतेर्न भीः।
यदि सङ्गविशेषस्य निषेध्री सा श्रुतिर्भवेत्॥203॥

तदा भेदविशेषस्य निषेध्री स्यात्तवश्रुतिः।
किं चैक्यभेदागमयोः परस्परविरोधतः॥204॥

व्यासङ्गे सति वागेषा कस्मात्स्वार्थं न साधयेत्।
परमार्थैक्ययोगेन विरोधो बलवान्यदि॥205॥

अताद्दग्भेदयोगेन दुर्बलोऽपि कथं न सः।
प्रतियोगिनि सामर्थ्यं प्राबल्ये कारणं यदि॥206॥

तर्हि भेदोऽपि सत्योऽस्तु तद्बलेन बलीयसा।

भेदस्मृतेर्विरोधेन तवैक्यस्याऽनुयोगिनः॥207॥

व्यर्थो भवेत्सत्यतैव भेदश्रुतिसहायिनी।

विशिष्टा च विचाराख्याशिष्टाचारसमेधिता॥208॥

स्मृतिः साधयति स्वार्थं व्यावहारिकतां क्षिपेत्।

उभयोः सत्यताऽयोगे भेद एवास्तु सन्मम॥209॥

सत्यं भिदेति शपथं कुर्वती श्रुतिरस्ति हि।

ऐक्यस्य सत्यतावाणी तवाऽपि न ममाऽपि न॥210॥

यदि सत्यब्रह्मरूपमैक्यं सत्यं भवेत्तव।

तर्ह्याऽऽर्थिकार्थसत्ता सा चोदनार्थः कथं वद॥211॥

मुख्यार्थभेदसत्ताऽग्रे तिष्ठेत्केन मुखेन सा।

बहुव्रीहौ च तद्योग एव स्यान्न तदेकता॥212॥

किञ्च श्रुतेरबाध्योऽर्थः सत्यःस्यान्न तु बाधितः।

यथाश्रुतैक्यवाक्यार्थं प्रत्यक्षादिविरोधतः॥213॥

त्वमेव बाधितं ब्रूषे कथं तस्याद्य सत्यता।

मुख्यवृत्तेरलाभे वाग्ज्ञातिवाक्यान्तराश्रिताम्॥214॥

अमुख्यवृत्तिमाश्रित्य ज्ञातिभिः सह मोदते।

न गोत्रकलहं कुर्यान्न च सर्वं जगत्क्षिपेत्॥215॥

| |
|---|
| व्यावहारिकशब्दोऽयं स्वकपोलेन कल्पितः।<br>अपौरुषेयवेदोक्तौ महापुरुषनिर्मिते॥216॥ |
| पुराणे च कथं योज्यः स्वमताग्रहतः परम्।<br>अनर्घ्यरत्नमालायां कः काचमपि योजयेत्॥217॥ |
| यद्गोत्रेष्वज्ञ जातोऽसि तान्गोत्रस्य प्रवर्तकान्।<br>ऋषीन्वृथावजानंस्त्वं कुलघ्नो नात्र संशयः॥218॥ |
| इत्थं सारस्वता विप्राः नृणां संशयनुत्तये।<br>पुरुषस्य पदाम्भोजसेवया तद्गतिं गताः॥219॥ |
| फलश्लोकममुंपश्य नृणां संशयनाशिनी।<br>महापुरुषसेवेयं किल तद्गतिदायिनी॥220॥ |
| इति स्तुताध्यायकथां कथं तां व्यावहारिकीम्।<br>वदेत्कः पण्डितो विद्वत्सभामध्ये दुराग्रहात्॥221॥ |
| किं चानया निगूढोक्त्या स्पष्टं कस्मान्न कथ्यते।<br>अतत्वावेदकत्वं हि व्यावहारिकता मता॥222॥ |
| एवं चेदैक्यवाक्यस्य विरोधाच्छ्रुतयोऽखिलाः।<br>कर्मकाण्डस्थिताश्चैव ब्रह्मकाण्डस्थिताश्च याः॥223॥ |
| नित्यनैमित्तिकं कर्म बोधयन्त्यः स्थले स्थले।<br>भेदादिकं साधयन्त्यः सन्ति सन्तोषदाः सताम्॥224॥ |

| |
|---|
| अतत्वावेदकाः सर्वास्ता इत्येव सभान्तरे।<br>कुतो वा नोच्यते वेदस्याप्रामाण्यं यदि स्फुटम्॥ 225 ॥ |
| वक्तुं भीतोऽसि तर्हि स्याच्छद्मना वेदनिन्दनात्।<br>दोषद्वयं तथैवाज्ञ वञ्चनं चाधिकं सताम्॥ 226 ॥ |
| श्रुत्योर्मिथो विरोधे च यद्येका मानतां त्यजेत्।<br>तर्हि बह्वीः कुतो हंसि तव श्रुतिरकल्पका॥ 227 ॥ |
| अर्हेदमानतां नोचेत्स्वानुकूलं वचः श्रुतौ।<br>मानयन्नितरान्वेदराशीन्सर्वानमानयन्॥ 228 ॥ |
| कुतो न युज्यते बौद्धः केन वा युज्यते भवान्।<br>अतः शङ्कापिशाचीयं नानेया बुधसंसदि॥ 229 ॥ |
| तस्मात्सर्वज्ञमुनिभिर्निर्णीतोच्चत्वधर्मवान्।<br>निर्णीतनीचभावेभ्यो जीवेभ्योऽभूद्धरिः पृथक्॥ 230 ॥ |
| यद्यैक्यं जीवपरयोस्तर्हि जीवः स्वपाप्मना।<br>नरके पच्यमानः सन् यद्दुःखमनुभोक्ष्यति॥ 231 ॥ |
| तस्य कर्तुश्च भोक्तुश्च प्रेरणाय सदा हृदि।<br>निवसन् भगवांश्च स्यात्तेन दुःखेन दुःखवान्॥ 232 ॥ |
| जीवस्यैवोचितं पापं जडस्य तु न पातकम्।<br>प्रायश्चित्तं नराणां वा शराणां वा विचारय॥ 233 ॥ |

| |
|---|
| देहान्तःकरणादेश्च न पापाश्रयता तव।<br>सुप्तौ सर्वलये पापाधाराभावप्रसङ्गतः॥234॥ |
| तस्यापि च लये सुप्तेर्लयः स्यान्निर्निमित्तकः |
| सर्वोत्पत्तेर्निमित्तं यत्कर्मप्राहुर्विचक्षणाः॥235॥ |
| प्रतिबिम्बे पक्षपाति तवाज्ञानं च पातकम्।<br>तज्जं दुःखाख्यसंसारं जीव एव विशेद्ध्रुवम्॥236॥ |
| धर्माधर्मौ कस्य गुणाविति बालान्विचारय।<br>क्षणभङ्गुरधीरेषा नास्ति कालान्तरे फलम्॥237॥ |
| कश्चिदानीन्तना बुद्धिर्भोक्त्री कालान्तरेऽपरा।<br>एकः पापानि कुरुते फलं भुङ्क्तेऽपरः किल॥238॥ |
| कृतहान्यकृतप्राप्ती को वा प्राप्तो वदेद्बुधः।<br>तस्मात्कर्ता च जीवोऽयं भोक्ता चाऽयं यतः स्थिरः॥239॥ |
| किञ्च बुद्धेरेव गुणौ धर्माधर्मौ मतौ यदि।<br>तर्हि कारणनाशेन तयोर्नाशो भवेद्ध्रुवम्॥240॥ |
| अतो बुद्ध्यन्तरोत्पत्तिः स्वर्गादेः प्राप्तिरेव च।<br>निर्निमित्ता भवेत्तस्माज्जीवस्यैव हि तौ गुणौ॥241॥ |
| एवं च पापिनोऽन्यस्य यतः पापफलं भवेत्।<br>अतो जीवस्यैव युक्ता नारकासुखभोक्तृता॥242॥ |

| |
|---|
| देहाधिकरणं यस्य करणं चक्षुरादिकम्।<br>मनोन्तःकरणं बुद्धिर्धीरूपा सैव विक्रिया॥243॥ |
| दुष्टगन्धरसादीनां घ्राणादीन्द्रियसङ्गमात्।<br>या धीः सा यातनारूपा बुद्धिर्दुःखकरी परम्॥244॥ |
| दुःखानुभवरूपस्तु सर्वत्रात्मेति ते मतम्।<br>बुद्धिस्तु बाह्यकरणैः बाह्यार्थानुभवः किल॥245॥ |
| तस्मान्नारकदुःखौघसाक्षात्काराख्यभोगवान्।<br>जीव एव भवेनोचेत्सिद्धान्तस्यान्तकृद्भवान्॥246॥ |
| यस्य स्मरणमात्रेण नरका च तरेन्नरः।<br>तस्य दिक्पालपालस्य नैव स्यान्नारकी व्यथा॥247॥ |
| पतितः स्खलितो मग्नः सन्दष्टस्तप्त आहतः।<br>हरिरित्यवशेनाह पुमान्नार्हति यातनाम्॥248॥ |
| इत्यादिस्मृतिभिः कृष्णनामकीर्तनमात्रकृत्।<br>भवतोऽपि यातनां नार्हेत्किं पुनः स महाप्रभुः॥249॥ |
| क्व कृष्णः कीर्तनादेव नरकक्लेशनाशनः।<br>क्व जीवः कीर्तनादस्य नरकक्लेशभाजनः॥250॥ |
| न कर्मणा लिप्यतेऽसौ पापकेनेति हि श्रुतिः।<br>न कर्मणा वर्धते नो कनीयानिति चापरा॥251॥ |

| |
|---|
| लोके कारयितारश्च लिप्यन्ते पातकैः किल।<br>हरेः कारयितुश्चांऽहो नाभूत्पश्यास्य कौशलम्॥252॥ |
| यत्पूर्वपाप्मना पापं कारयेन्नतु वैरतः।<br>तत्पापलेपवान्नासौ चोरशूलप्रदातृवत्॥253॥ |
| अप्सुमज्जयतश्चोरं न पापं नापि चासुखम्।<br>तथा हरेः कारयितुः कुतः स्यादशुभागमः॥254॥ |
| यस्मिन्काले यत्न देशे यो राजा तस्य केवलम्।<br>तत्कालपापिनां शिक्षा श्लाघ्या न तु ततोऽन्यदा॥255॥ |
| हरेस्तु सर्वदेशेषु सर्वलोकेषु च प्रभोः।<br>पूर्वादफलदत्वच यच्छ्लाघ्यं प्राह सूत्रकृत्॥256॥ |
| राजाधिराजस्तेनासौ कीर्त्यते सर्ववैदिकैः।<br>पराऽस्य शक्तिरित्यस्तौत्तथा तमपरा श्रुतिः॥257॥ |
| नरकादौ दुःखफलं भोजयित्वैव पातकम्।<br>प्रायः स नाशयेन्नृणां क्वचिच्च स्मरणादिना॥258॥ |
| अपरोक्षज्ञानतश्च बलाद्भोगं विनैव च।<br>पापानि नाशयेद्विष्णुरिति सर्वस्यसम्मतम्॥259॥ |
| एवं च सर्वपापानि फलेन च बलेन च।<br>अज्ञानिनां ज्ञानिनां च यतो नाशयति प्रभुः॥260॥ |

| |
|---|
| अतो न कौशलेनैव पापालेपो रमापतेः।<br>किन्त्वन्धतमसं भास्वानिव हन्ति स्वतेजसा॥261॥ |
| कृतेन योऽकृतो नास्ति तं मोक्षं ज्ञानमात्रतः।<br>विनैव कर्म यो दद्यात्तस्यासाध्यं किमस्ति तत्॥262॥ |
| श्रुतिप्रामाण्यरक्षायै क्वचित्कौशलमाश्रयेत्।<br>किं चिच्छक्तिं यतः सर्वस्येशान इति च श्रुतिः॥263॥ |
| कर्तास्य जन्मादिषु यो न बध्यत इति श्रुतेः।<br>संहृत्य निखिलं यस्य न लेपः क्वास्य पातकम्॥264॥ |
| पापेन पापलोकं स नयतीति च वेदवाक्।<br>तत्पापजा नारकार्तिरपापस्य कथं भवेत्॥265॥ |
| एकोपाधिगतावेव यज्जीवपरमाविमौ।<br>विलक्षणस्वभावौ तत्तयोरैक्यकथा वृथा॥266॥ |
| बिम्बस्यप्रतिबिम्बैक्यमपि युक्तिसहं न ते।<br>प्रत्यक्पराग्भावरूपविरोधस्य स्फुटत्वतः॥267॥ |
| अस्मदर्थो ह्यात्मतत्वं प्रत्यद्रूपश्च तत्किल।<br>युष्मदर्थस्तु विषयः पराद्रूपः स चाखिलः॥268॥ |
| तयोः प्रत्यक्पराग्भावमात्रेणैव विरुद्धयोः।<br>नेतरेतरभावोऽस्तीत्याह भाष्यकृदेव ते॥269॥ |

| |
|---|
| अतः प्रत्यक्पराग्भावान्न बिम्बप्रतिबिम्बयोः।<br>ऐक्यं स्यादात्मजडयोरिवेति प्रतिवादिना॥ 270॥ |
| साधिते सति तद्युक्तिं प्रत्याख्याति कथं भवान्।<br>विपक्षे तव दूष्यं स्याद्बाध्यमित्यस्ति बाधकम्॥ 271॥ |
| नह्यानैकान्तिकं हेतुमादावेव वदेत्सुधीः।<br>कथं मृदुमुखं कांस्यदर्पणस्यान्तरं विशेत्॥ 272॥ |
| न चेन्मुखेऽपि दाहस्स्यात्तप्ताम्बुप्रतिबिम्बिते।<br>कथं स्थूलगजस्य स्यात्सूक्ष्मोपाधौ प्रवेशनम्॥ 273॥ |
| यदि स्यात्तर्हि भारेणकरात्स पतितो भवेत्।<br>प्रविष्टस्य तथैव स्यादाकारो नत्वतादृशः॥ 274॥ |
| जले स्नातुर्मुखं नोचेद्विपरीतं भवेत्तव।<br>दर्पणं सुरभीकुर्यात्कस्तूर्यतः प्रवेशतः॥ 275॥ |
| अतो विसदृशत्वाच्च न बिम्बप्रतिबिम्बयोः।<br>एकता वक्तुमुचिता न्यायसञ्चारवेदिना॥ 276॥ |
| निबिडावयवासङ्गात्परावृत्य मुखं स्वकम्।<br>पश्येन्नयनमित्याह कश्चित्तच्च न युक्तिमत्॥ 277॥ |
| तर्हि दर्पणतस्तस्मात्परावृत्तेन चक्षुषा।<br>दर्पणोल्लेखिनी बुद्धिर्नैवोत्पाद्येति मे मतिः॥ 278॥ |

| |
|---|
| किन्तु कण्ठोपरि मुखमित्यवेक्ष्येत तन्मुखम्।<br>एवं च प्रतिबिम्बस्यैवाभावोऽपि भवेत्तव॥ 279॥ |
| अतः कयोरेकतास्याज्जीवोऽप्यस्तङ्गतो भवेत्।<br>न परा ववृते कस्माच्छिलातो नयनं तव॥ 280॥ |
| जलात्कुतो निवर्तेत ततोऽपीदमसङ्गतम्।<br>अवाङ्मुखस्य ग्रस्तार्कं पश्यतः पात्रगोलके॥ 281॥ |
| निवृत्तमपि ते चक्षुः कथं नर्भिद्य मस्तकम्।<br>मध्यन्दिनगतं सूर्यं पश्येदत्युग्रदीधितिम्॥ 282॥ |
| नैमित्तिकमिदं कार्यं निमित्ते सति जायते।<br>तदभावे पुनर्नश्येत्पद्मकोशविकासवत्॥ 283॥ |
| यथा वा त्रपुसीसादेर्द्रवत्वं  वह्निसङ्गमात्।<br>सूत्रकृच्चोपमामाह सूर्यकादिनिदर्शनात्॥ 284॥ |
| प्रतिबिम्बस्य जीवस्य तद्बिम्बाल्पोपमा भवेत्।<br>अस्योपाधिरुपादानं प्रत्यासत्तिर्मुखस्य च॥ 285॥ |
| निमित्तं दुष्टकार्यस्य बलात्किं किं न कल्प्यते।<br>किं सूर्यवत्सूर्यकोऽपि स्वभासा भासयेद्दिशः॥ 286॥ |
| यत्सूत्रकारानुदितं तत्को वा भाष्यकृद्वदेत्।<br>पश्यादर्शे मुखच्छायामित्येवाहुर्हि लोकिकाः ॥ 287॥ |

| |
|---|
| दर्पणे मुखमित्युक्तिर्न लोके नाऽप्यलौकिके।<br>अस्तिचेत्साऽपि सादृश्यान्मुखचन्द्रादिवाक्यवत्॥288॥ |
| कथं प्रतीचः शब्दोऽयं पराचः स्याद्विचारय।<br>यथा चित्रस्य सिंहस्य सिंहसाम्येन सिंहवाक्॥289॥ |
| तथा प्रतिमुखस्यापि मुखसाम्यान्मुखत्ववाक्।<br>न हि प्रतिमुखत्वं च मुखत्वं चैकवस्तुनि॥290॥ |
| मुख्यं स्यात्तेन मुखवागेव तत्रौपचारिकी।<br>मुखं प्रतिस्थितं वस्तु यतः प्रतिमुखं स्मृतम्॥291॥ |
| अतस्तादृशशब्दोऽसावेव मुख्यत्वमर्हति।<br>मुखशब्दो मुखे रूढः कथमन्यत्रनीयते॥292॥ |
| विनोपचारं नह्यस्य तत्राप्यस्त्यनुशासनम्।<br>मुखं प्रति स्थितत्वं च मुखस्यैव कथं भवेत्॥293॥ |
| न हि स्वस्कन्धमारुह्य स्वयमेव प्रनृत्यति।<br>अतो मुखात्पृथग्भूतं वाच्यं प्रतिमुखं बलात्॥294॥ |
| भिन्नवाचकशब्दोऽयं विना गौण्या कथं वदेत्।<br>तद्बिम्बप्रतिबिम्बत्वमपि जीवपरेशयोः॥295॥ |
| वैसादृश्याद्भेदमेव साधयेन्नतु बाधयेत्।<br>बोधयेद्वा प्रतिकृतेबिम्बहर्यनुगामिताम्॥296॥ |

विरुद्धप्रकृतिर्यद्वत्समप्रत्ययवत्यपि।

क्रोष्ठुः स्रष्ठा स पोष्ठेशः क्रोष्ठा जीवस्तथैव च॥ 297॥

सस्वतन्त्रोऽन्यतन्त्रोऽयं जीवः पूर्णसुखो ह्यसौ।

अयमल्पसुखो नित्यमुक्तौऽसौ बन्धभूरयम्॥ 298॥

स सर्वज्ञोऽयमल्पज्ञः सोऽभयोऽयं भयातुरः।

स लक्ष्मीशो दरिद्रोऽयं स धर्ता धार्यते जगत्॥ 299॥

स सर्पशयनः सोऽयं वल्मीकोपान्तभूभयः।

स देवो गरुडारूढः सोऽयं गारुडजीवनः॥ 300॥

स  दिक्पालार्चितपदः सोऽयं दिक्पलापूजकः।

स यज्ञभुगयं यज्वा स पूज्यः पूजको ह्ययम्॥ 301॥

स देवर्षिगणत्राता सोऽयं देवर्षितर्पकः।

अमर्त्योऽसावयं मर्त्यः सोऽजन्मी जन्मवानयम्॥ 203॥

स दुष्टकुलसंहारी सोऽयं दुर्जनसेवकः।

सोप्राकृतमहाकायः सोऽयं निन्द्यकलेवरः॥ 303॥

शैलोद्धरणशीलोऽसौ शिलाभारासहो ह्ययम्।

स सिन्धुबन्धनक्रीडः कुल्याबन्धाक्षमो ह्ययम्॥ 304॥

स गङ्गाजनकः सोऽयं गङ्गास्नानपरायणः।

स वेङ्कटपतिः सोऽयं तद्यात्राकरणव्रती॥ 305॥

| |
|---|
| स प्रभुर्निर्गमोद्धर्ता सोऽयं तन्मन्त्रजापकः।<br>इत्थं प्रकृत्या यौ नित्यं विरुद्धशतधर्मिणौ॥306॥ |
| तयोरैक्यं तदैव स्याच्छशश्रुङ्गं भवेद्यदि।<br>रज्जुसर्पौ भवेच्छुक्ती रजतं वा यदा भवेत्॥307॥ |
| गङ्गायां घोष इत्याप्तशतैरप्युदिते सति।<br>तस्यानुकूलमेवार्थं कालयेद्धि विचक्षणः॥308॥ |
| वाक्यमस्तीत्ययोग्यार्थे मतिं कः कुरुते सुधीः।<br>अधिरोहति किं पुत्रः स्वसारं मातरं श्रुतेः॥309॥ |
| कर्ता कर्म न चेद्ब्रह्म गम्यं दृश्यं मतं श्रुतम्।<br>ध्यातं गातं द्रष्टुमन्तृश्रोतृध्यातृचितः पृथक्॥310॥ |
| यद्यैक्यश्रुतिसाचिव्यादभेदः कर्तृकर्मणोः।<br>तर्हिचेत्स्वप्रकाशत्वश्रुत्या वेद्यस्यवेत्तृता॥311॥ |
| तत्र श्रुतेर्बलवती युक्तिश्चेदत्र पञ्चधा।<br>स्पष्टं निरूपितायुक्तिः पञ्चबाणशरोपमा॥312॥ |
| तव श्रुतिस्त्रियं चोरः कुरुते स्वैरचारिणीम्।<br>आत्मा वा इति वाग्ब्रह्मविदाप्नोतीति वाक्क ते॥313॥ |
| ब्रह्मणः कर्मतामाह पञ्चधा या प्रपञ्चिता।<br>दृश्यते ब्रह्मचिन्मात्रं निर्विकल्पकधीर्हि सा॥314॥ |

| |
|---|
| ततः श्रोतव्यमन्तव्यध्येयत्वादि च तद्गतम्।<br>सामानाधिकरण्याय तेनारण्याय शोभसे॥315॥ |
| दृश्यमात्मानमेवाद्या श्रोतव्यादितया जगौ।<br>दृश्यं ब्रह्मैव गम्यं च वागन्त्या निर्णिनाय हि॥316॥ |
| यं ग्रामं श्रुणुयान्मत्वा ध्यात्वा मार्गे तमेव च।<br>मध्ये पश्यन् विशत्यन्ते तेन युक्तिं युनक्ति वाक्॥317॥ |
| एवं च श्रुतियुक्तिभ्यां कर्मतैकस्य सम्मता।<br>तत्वान्मतोदितं मध्ये नर्विकल्पकगोचरम्॥318॥ |
| चिन्मात्रं देहलीदीपायते कर्मविनिर्णये।<br>यः  पुण्यकर्ता तज्जन्यफलभोक्ता स एव हि॥319॥ |
| तद्धेतुयागकर्ता च यजमानो न चापरः।<br>पूर्वदेहोऽस्य पूर्वाङ्गं स्वर्देहोऽस्याङ्गमुत्तरम्॥320॥ |
| प्राग्देहो यज्ञकर्ताचेत्कृतहानिर्भवेन्मृतौ।<br>स्वर्देहो भोगभोक्ता चेदकृताभ्यागमो भवेत्॥321॥ |
| यथा सर्वत्र कर्तृत्वं चितस्तद्वदिहापि च।<br>कर्तीजीवचिदेवाभूत् साकर्म ब्रह्मचित्कथम्॥322॥ |
| किं चैक्याध्यक्षधीवेद्यं कर्म चिन्मात्रमेव ते।<br>ब्रह्माहमस्मीति दृशिकर्तृतां चैकतोचितम्॥323॥ |

| |
|---|
| चिन्मात्रमेव भजते निर्विकल्पकसंविदि।<br>किमन्यः स्वप्रकाशः स्यात्तश्चिन्मात्रकर्तृता॥ 324 ॥ |
| बलादभूत् तेन चितावभूतां कर्मकर्तृते।<br>ततः काकाक्षितामाप तव ब्रह्मनिरीक्षणम्॥ 325 ॥ |
| यत्कर्तृचित्कर्मचिच्च नैकेयं ते मते भवेत्।<br>तत्सर्वप्रक्रियां हन्ति तवैका प्रक्रियोरगी॥ 326 ॥ |
| एवं ज्ञानफलीभूतगत्या गम्यं तदेव हि।<br>उक्तन्यायो न चेत्कुप्येत्तत्कर्मचिदभूद् ध्रुवम्॥ 327 ॥ |
| अत्र कर्तृ च चिन्मात्रं चितोऽन्यन्मन आदिकम्।<br>करणं कर्णतः श्रुण्वन्मन्वानो मनसा तथा॥ 328 ॥ |
| ध्यायन् पश्यंश्चेतनो हि तवापि च ममापि च।<br>दर्शनानन्तरं यद्धि ब्रह्माप्नोति फलात्मना॥ 329 ॥ |
| सा चिद्धि तेन तद्धेतुमालेयं तद्गतैव हि।<br>न्यायः कुप्येन्नचेदुक्तो मुक्तोऽपि त्वं निपात्यसे॥ 330 ॥ |
| मनोवृत्तिर्हि दृक्सर्वारोपः स्यान्नोचितश्चितः।<br>निराकारा च सा चित् तद्ब्रह्म कर्मबलादभूत्॥ 331 ॥ |
| गत्या गम्यं हि ते ब्रह्म कर्मैवात्रापरा गतिः।<br>न तेऽपितेन सर्वत्र गतिः सैवोक्तवर्त्मना॥ 332 ॥ |

| |
|---|
| मुक्तौ तत्कर्मतामर्हेत्तन्नार्हेत्कुत्र कर्मताम्।<br>स्वरूपवेदनायां हि कर्मतां त्वं न मन्यसे॥ 333॥ |
| वेदनान्तरवेद्यस्य कर्मता सम्मतैव तत्।<br>एवं च कर्तृ कर्मत्वमेकत्रानुचितं तव॥ 334॥ |
| कर्मक्षयाख्यमुक्तौ च नामुञ्चदिति मे मतिः।<br>विरुद्धधर्मवैशिष्ट्यवत्योश्चित्योश्च नैकता॥ 335॥ |
| अविद्याध्वंसकालीनं समस्तं च न मायिकम्।<br>इति यस्यरहस्यं हि तस्यहास्यमभून्मतम्॥ 336॥ |
| फलं च विषवृक्षस्य फलकल्पमभूदहो।<br>एकक्रियायामेवैकं कारकद्वयरूपवत्॥ 337॥ |
| न भवेदिति या युक्तिः सा सर्वत्र समैव हि।<br>यत्कुठारः स्व(स)स्वरूपं स्वयमेव च्छिनत्ति न॥ 338॥ |
| अतः क्रियाया वैजात्यान्न किञ्चिदपि ते फलम्।<br>परस्मिन्समवेताया क्रि(तंतत्क्रि)या तत्फलशालि यत्॥ 339॥ |
| तत्कर्मेत्युच्यते तच्च क्रियायाः समवायनि।<br>स्वस्मिन्कर्तरि नैव स्यादिति युक्तिर्हि मायिनाम्॥ 340॥ |
| अतः कर्तृत्वकर्मत्वे कथमेकत्र सङ्गते।<br>भवेतामैक्यधीरूपस्वनिष्ठैक क्रियां प्रति॥ 341॥ |

| |
|---|
| अतो ब्रह्मचितो जीवचितश्च द्विप्रकारता।<br>तयोर्द्वितां दिशेत्सा च तद्भेदं साधयेद्ध्रुवम्॥ 342॥ |
| किं भेदेऽपि श्रुतेः सत्वाद्युक्तिर्बलवती मम।<br>कथं न साधयेत्स्वार्थं व्यर्थीकृत्य भवच्छ्रुतिम्॥ 343॥ |
| तत एव न भेदोऽयमसत्यस्त्वच्छ्रुतेर्भिया।<br>किं चापरोक्षज्ञानान्ते गन्तृगम्यत्वयुक्तितः॥ 344॥ |
| महामुक्तौ च यत्सत्ता तत्सत्ता केन बाध्यते।<br>कथं कदाचिन्मुक्तस्य नित्यमुक्तस्य चैकता॥ 345॥ |
| हन्तोभौ तौ च धर्मौ तौ भिन्तोऽकर्णास्तकर्णवत्।<br>अपि चैक्यनिषेधात्मा भेदो मे तेन तेऽष्वना॥ 346॥ |
| निषेध्यैक्यस्यैव सत्ता न युक्ता दुर्बलं हि तत्।<br>अतस्तवैव बाणेन प्राणत्यागोभवत्तवा॥ 347॥ |
| किं च राज्ञो द्रोहकर्ता राष्ट्रस्य द्रोहकृच्च यः।<br>स एव रूक्षः सर्वत्र शिक्ष्यो दृष्टो न चापरः॥ 348॥ |
| एवं च श्रौतनित्येशसर्वसर्वस्वमोचकम्।<br>शोचकं तदनन्यस्य सर्वस्य जगतोऽपि च॥ 349॥ |
| तवैक्यमेव शिक्ष्यं स्यान्न तु वेदोखिलस्य च।<br>रक्षकः सर्वमर्यादानिर्वाहकशिरोमणिः॥ 350॥ |

| |
|---|
| भगवच्छ्रौतमाहात्म्यवार्धिवर्धनचन्द्रमाः।<br>तत्सत्यार्था श्रुतिर्भेदश्रुतिरेव न ते श्रुतिः॥351॥ |
| त्यजेदेकं कुलस्यार्थ इति प्राचां वचः स्मर।<br>सर्वनाशे समुत्पन्ने सत्यर्धं रक्षते किल॥352॥ |
| दत्वाऽपि पृथिवीं सर्वामात्मा रक्ष्योऽखिलैः किल।<br>तत्स्वनाशजगन्नाशौ वाक्योक्तेर्नाभिसंहितौ॥353॥ |
| यथा चोरगृहीता स्त्री स्वशिरच्छेदकारणम्।<br>दत्वासुवर्णताटङ्कं कर्णपत्रधरा सती॥354॥ |
| जिजीविषेत्तथैषा वाक् केनाप्यर्थेन जीवति।<br>रत्नताटङ्कसदृशमुख्यार्थे सति भारती॥355॥ |
| अर्थदातारमेवेयं भर्तारं भजते ध्रुवम्।<br>ब्रह्म द्वितीयं नैवेति वाक् चाश्वो नेतिवाक्यवत्॥356॥ |
| द्वितीयादतिभिन्नं तद्ब्रह्माह पदसम्पदा।<br>तद्दुग्धदोग्ध्री गौरेषा प्रक्षिपन्ती न कर्कटी॥357॥ |
| यन्मिथ्यात्वश्रुतिश्चाह न मिथ्यात्वं स्वनाशकम्।<br>तत्सत्यार्थश्रुतेरर्थव्यत्यासाय श्रमो वृथा॥358॥ |
| त्वं चामीषु विकारेषु सन्सदा व्यावहारिकः।<br>इत्युक्तेर्ब्रह्मसाम्याप्त्या व्यत्यासेऽपि न मेऽस्थि भीः॥359॥ |

| |
|---|
| निष्प्रकारकतानर्हरूप्याभावादिगोचरा।<br>नेदं रजतमित्याद्या बाधिका धीर्विदां मता॥360॥ |
| तन्निर्विकल्पकब्रह्मप्रमा बाधप्रमैव न ।<br>बाधाभावाच्च भेदादेः सत्यताभूद्बाधिता॥361॥ |
| या चान्ते निर्विकल्पा धीः सा चोत्तरविकल्पतः।<br>अनुमेया तवैक्ये च नासौ स्याद्भ्रमरूपवान् ॥362॥ |
| अतोऽनुमापकाभावात्सैवाभूच्छशशृङ्गवत्।<br>अध्यक्षाच्च न सा सिध्येदतीन्द्रियशरीरिणी॥363॥ |
| माया यथाऽयो भ्रमत इति भागवते शुकः।<br>कांस्यपात्रसदुक्तृच्छजीवेष्वेव कृतास्पदे॥364॥ |
| यदाश्रयेति प्रागुक्तत्रिगुणाश्रयतोचिते।<br>मायापदोदिताज्ञाने जीवानां भवकारणे॥365॥ |
| अयसः कांस्यपात्रान्तर्भ्रमतः समतोदिता।<br>ग्राव्णे नमस्त इत्यन्ते सोऽयस्कान्तशिलोपमाम्॥366॥ |
| जगतामीश्वरे प्राह तेनाज्ञीनादि दूरगम्।<br>अधोभागे विदूरस्थमायाभ्रमणकारणम्॥367॥ |
| मम स्वामिनमेवाह न तु मायामयं जगौ।<br>यथोपाधिर्दर्पणादिप्रतिबिम्बस्पृगीक्ष्यते॥368॥ |

| |
|---|
| मुखाख्यबिम्बाद्दूरस्तथाऽज्ञानं च जीवगम्।<br>भवेत्तवापि राद्धान्ते बिम्बाख्यब्रह्मणस्तु तत्॥ 369 ॥ |
| अतिदूरस्थितं च स्यादतो युक्तिमती स्मृतिः।<br>तन्मायित्वश्रुतिः सर्वा निर्माये धनितोक्तिवत्॥ 370 ॥ |
| योज्याहमिति चाध्यक्षं जैवप्रत्यक्षमेव तत्।<br>ब्रह्माज्ञानकथाप्यज्ञ तत्स्वाज्ञानानुमापिका॥ 371 ॥ |
| निर्मायभगवद्भेदस्तन्मायाकल्पितोऽपि न।<br>एवं चामायिकःसोऽयं कथं स्याद्व्यावहारिकः॥ 372 ॥ |
| युजिर्योग इतिख्यातधातूत्थफलबोधिते(तः)।<br>सायुज्याख्यमहामोक्षेऽप्येकस्थानस्थयोर्द्वयोः॥ 373 ॥ |
| योगाविनाभूतभेदः स्यादेवेश्वरजीवयोः।<br>योऽविद्यास्तमयेऽप्यस्ति स कथं व्यावहारिकः॥ 374 ॥ |
| न यत्न मायेति वाणी यस्य स्थानीममायिकाम्।<br>ब्रूते तस्याः पतिः सोऽयं कथं मायामयः प्रभुः॥ 375 ॥ |
| अतस्तत्र श्रुताः सर्वमुक्ताश्चासन्नमायिकाः।<br>हरेरनुव्रताः सर्वेऽप्यपरे च हरेः किल॥ 376 ॥ |
| प्रभुणा च मिथश्चैषां भेदो यः सोऽप्यमायिकः।<br>व्यावहारिकता तस्मादस्माद्दूरं गता भवेत्॥ 377 ॥ |

| |
|---|
| किञ्च प्रत्यक्षसचिवा बाध्या भेदश्रुतिः किल।<br>बाधकं तद्विरुद्धैक्यवाक्यमित्यपि को वदेत्॥378॥ |
| शस्त्रानुबद्धो हस्तीन्द्रहस्तः शत्रोर्न मारकः।<br>शस्त्रेण शकलीभूतः शतॄणां मारकः किल॥379॥ |
| उक्तवाक्यार्थनिर्णीत्यै प्रत्यक्षानुसृतिर्नृणाम्।<br>त्वं तु हन्ताक्षरोधेऽपि वाक्यार्थे निर्णिनीषसि॥380॥ |
| एवं सत्यग्निना सिञ्चेदिति वाक्यं प्रमापकम्।<br>कुतो माभूदक्षरुद्धतदसिद्धार्थबोधकम्।381॥ |
| गताध्वनि पुनर्गच्छन्मार्गं निश्चिनुतेऽखिलः।<br>कदध्वीकुरुषे त्वं तु पताध्वनि पुनर्गतौ॥382॥ |
| स्वाक्षसिद्धतृणाद्यर्थं वदन् शाकुनिकोऽखिलैः।<br>किं मान्यते हन्यते वा तत्सिद्धिर्भूषणं गिराम्॥383॥ |
| स्वाक्षसिद्धिः स्ववाक्यस्य यदि दूषणमुच्यते।<br>तर्हि स्वदुष्टमेवार्थं वदन्तीं मानय श्रुतिम्॥384॥ |
| सर्वज्ञव्यासवाक्यं च श्लोक्यं न स्याज्जगत्त्रये।<br>परेण दृष्ट एवार्थे तद्भ्रांर्तित्ववारिका॥385॥ |
| परमाप्ततमस्योक्तिर्व्यर्थीभवति किं वद।<br>भेदेऽक्षसिद्धभ्रान्तित्वशङ्कां श्रुत्या निवारयन्॥386॥ |

श्रुतेः श्रुत्यन्तरात्सत्वं तत्सहायेन साधयन्।
कथं वा दूष्यते मन्द यः  पोष्योऽखिलवादिभिः॥387॥

परदृष्टार्थकथनमपि तस्मान्न दूषणम्।
स्वदुष्टा च कथा स्वाप्तवाक्यत्वादतिभूषणम्॥388॥

श्रवणादेव  दृष्टोऽर्थो यतनार्हो न ते मते।
ध्यानार्हश्च स एवार्थः सार्था चेयं परम्परा॥389॥

उक्तस्यैव पुनश्चोक्तौ योऽभ्यासः सोऽभ्युपेयते।
नवकृत्वश्च योऽभ्यासः सोऽपि श्लाघ्यतमो हि ते॥390॥

दृष्टार्थकथनं तस्मात्कस्माद्दोषाय कथ्यते।
मिथस्तयोर्हि संवादाद्विवादापगमो यतः॥391॥

सर्वज्ञः सूत्रकृत्स्वोक्तसर्वार्थप्रत्ययाय याम्।
प्रमाणीकुरुते कस्ताममानीकुरुते श्रुतिम्॥392॥

स्वदृष्टार्थेष्वसत्यत्वशङ्कापङ्कापनुत्तये।
यामीशोऽपेक्षते को वा मानवस्तामुपेक्षते॥393॥

किञ्च ब्रह्म विशिष्टं ते वृद्ध्याध्यैर्गुणसञ्चयैः।
विष्णुब्रह्मशिवेन्द्राद्या विशिष्टाः स्वोचितैर्गुणैः॥394॥

मुनयः सर्वजीवाश्च विशिष्टा एव ते मते।
शिष्टैक्यं च ते नास्ति तदेषामैक्यवाग्वृथा॥395॥

| |
|---|
| तवेष्टन्तु चितोरैक्यं श्रुतौ न श्रूयते क्वचित्।<br>अतस्तच्छाययान्यत्र लक्षणाश्रयणं च न॥396॥ |
| न हि गङ्गापदाल्लक्ष्यं नृश्रृङ्गं क्वापि कथ्यते।<br>किन्तु प्रामाणिकं तीरं तथान्तर्यामिलक्षकम्॥397॥ |
| अहमादिपदं स्याद्धि नत्वप्रामाणिकं वदेत्।<br>अतः सर्वश्रुतिभ्योऽपि बहिर्भूतमभूदिदम्॥398॥ |
| एवं चाश्रौतमैक्यं ते भेदश्रुतिरबाधिता।<br>कथं न बाधते मन्द प्रतिद्वन्द्वविवर्जिता॥399॥ |
| किञ्चायोग्यार्थघटनां श्रुतौ कर्तुं हि पाणिनिः।<br>सप्तसु प्रथमामाह तत्प्रत्याह मतं तव॥400॥ |
| अहं ब्रह्मणि तस्मिंस्त्वं सर्वं ब्रह्मणि वर्तते।<br>इत्याद्यैक्यं वदेदैक्यवाक्यं मुख्यार्थबाधतः॥401॥ |
| तद्भेदः सत्यतामर्हन्नैक्यं युक्तिशतैर्मृतम्।<br>गुणानुवादं शंसन्तो गुणानुकथनं तथा॥402॥ |
| हरेर्गुणानुवादं च श्लोक्यमाहुः शुकादयः।<br>तस्मादेको देव इति श्रुतिरुक्त्वा हरेर्गुणान्॥403॥ |
| तदन्ते दुर्मतप्राप्तनिर्गुणत्वजिहीर्षया।<br>समुच्चितं गुणैरुक्तैस्तमेवानिर्गुणं जगौ॥404॥ |

| |
|---|
| अपूर्वोऽयंपदच्छेदो यत्पूर्वं चोदिता गुणाः।<br>मुक्त्यध्वनीनैस्तच्छ्लाघ्यो मध्वस्याध्वेति मे मतिः॥405॥ |
| किञ्चैकं ब्रह्मचैतन्यं व्याप्तं सर्वत्र सर्वदा।<br>अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥406॥ |
| इत्यादिश्रुतितो  वाच्यं त्वयापि च मयापि च।<br>अनन्तशक्तियुक्तं तदणु चाङ्गीकृतं मया॥407॥ |
| त्वया तु शक्तिविधुरमखण्डं महदेव तत्।<br>अच्छेद्यं चोच्यते तस्मात्तस्य सञ्चरणं न हि॥408॥ |
| किं स्याद्घटाभ्रसञ्चारो घटाद्यैरप्युपाधिभिः।<br>अतः सञ्चरणार्हाणि चैतन्यानि पृथक् पृथक्॥409॥ |
| हन्तः सञ्चरणानर्हजडदेहप्रवृत्तये।<br>वाच्यानि नानाभोगाय भिन्नभिन्नान्यनादितः॥410॥ |
| तत्सञ्चारेण सञ्चारो जडदेहस्य नान्यथा।<br>अतस्तान्येव देहान्तः क्रियावन्ति ह्यणूनि च॥411॥ |
| अभ्रोपाधिघटादीनां सञ्चारोप्यन्यचेतनैः।<br>इतस्ततः स्थापने स्याद्देहे देहे न चापरः॥412॥ |
| प्रवर्तकश्चे तनोऽस्ति सह तेन प्रवृत्तिमान्।<br>तद्घटाकाशदृष्टान्तो दुर्घटस्ते विचारणे॥413॥ |

| |
|---|
| देहप्रवृत्तये व्याप्तब्रह्मचिद्भिन्नचिद्यतः।<br>बलाद्वाच्या तेन शोच्या सर्वापि प्रक्रिया तव॥414॥ |
| अनादितोऽपि भिन्नानां चितां लिङ्गस्य भङ्गतः।<br>स्वस्वाकारस्यशुद्धिः स्यात्पङ्कादुत्क्षिप्तरत्नवत्॥415॥ |
| रत्नान्तरैकता रत्ने नैव दृष्टा तदापि हि।<br>अतः शुद्धानन्तचितो मुक्तौ च स्युः पृथक् पृथक्॥416॥ |
| तद्बन्धच्छेदको विष्णुर्बन्धोच्छित्तेरनन्तरम्।<br>अप्यन्नदाता ज्ञेयः स गोप्ता तेन पदे पदे॥417॥ |
| बन्धमुक्तानुगस्तुत्यराजादिरिव सर्वदा।<br>मुक्तानामप्यधीशोऽस्तु मास्तु मूढाखिलक्षयः॥418॥ |
| प्रमा तु निर्विकल्पा ते साधिका बाधिका न सा।<br>सविकल्पा च सर्वा धीर्न प्रमा तत्तवाखिलाः॥419॥ |
| शास्त्रार्थाः केन मानेन साध्याः स्युर्बुधसंसदि।<br>अप्रमाणाच्च सर्वार्थसिद्धौ सर्वं भवेद्धि सत्॥420॥ |
| वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः।<br>प्रथमः सुधियां कण्ठालङ्कारं कुरुतेतराम्॥421॥ |

॥ इति श्रीमद्वादिराजपूज्यविरचितन्यायरत्नावल्यां प्रथमः सरः॥1-421॥

## द्वितीयः सरः ॥2-129॥

किञ्चैकजीववग्दे ते जीवस्त्वेकोऽपरे जडाः।
स चाबुधो न चेद्घोरसंसाराऽऽधारताऽस्य नः ॥2-1॥

तद्वेदद्रष्टुवाक्यानि नैक्यायासन् जडा हि ते।
अजडस्तेऽति मूढोऽत्र न बोध्यो नापि बोधकः ॥2-2॥

स्वरीत्यैवाखिलं वेदं बहिष्कुर्वन्नकौशलः।
स्वयं जडो वा ब्रह्मेन्द्ररुद्राद्या वा जडा वद॥2-3॥

जडाः प्राहुणिकाः सर्वे जडाश्च प्राश्निकाः किल।
विवाहश्च विवादश्च जडयोः शवयोः किल॥4॥

सन्ध्ये स्तुष्टिरिति श्रुत्या स्वाप्नव्याघ्रगजादयः।
अजडा एव तत्कालसृष्ट्या दृष्ट्या च तत्क्षणे॥5॥

स्वाप्नावसाने सर्वे ते नष्टाः स्युः स्त्रष्टुरिच्छया।
कार्त्स्न्येन ह्यनभिव्यक्तरूपत्वं तेषु वस्तुषु॥6॥

असूत्रयत्सूत्रकारस्तेन सूक्ष्मतमाश्च ते।
जडाश्चैवंविधाः सन्ति सृष्टिकौशलमीशितुः॥7॥

को वेद तेन ते स्वप्नद्रष्टुजीवस्य दृष्टितः।
न सृष्टाः किं तु हरिणा सृष्टा दृष्टाः परं नृभिः॥8॥

अतः स्वमूलशास्त्रार्थमृढत्वाच्च जडो भवान्।
निदर्शनं स्वं निर्वोढुमशक्त्या च जडो भवान्॥9॥

अपि चानादिमूढस्य मौढ्यं हर्तुं पदे पदे।
उपकर्तुं च तत्वानि व्याकर्तुं चास्ति कः पुमान्॥10॥

जडो व्याख्याति सत्तत्वमजडश्च श्रुणोति तत्।
इति यो वक्ति जडता तस्य वा स्याद्धटस्य वा॥11॥

किञ्चास्य स्वप्न एवान्यो यदा दुःस्वप्नदृग्जनः।
तच्छान्त्यै पायसं जुह्वन् दृष्टः कष्टं तदा तव॥12॥

यथा स स्वप्नदृङ्मिथ्या वृथाऽस्य श्रवणादि च।
तथायमपि च द्रष्टा तस्याष्टमरसोपमम्॥13॥

नान्योतोऽस्तीति वाचा यद्दृष्टमात्रं न ते मते।
न किञ्चनेति वाक्चैवं सति सङ्कुचितैव न॥14॥

श्रुतियुक्तिविरुद्धं च यदि रक्ष्यं मतं तव।
तर्हि व्यासस्य राद्धान्तगुप्त्यै रक्ष्यं मतं मम॥15॥

यद्वैधर्म्याच्च न स्वप्नादिवदित्याहसत्प्रभुः।
स वै स्वतन्त्रद्रष्टा मे मतोऽन्यस्तु तदाज्ञया॥16॥

अतस्तदुक्तमार्गेण वर्तितव्यं उभूषुणा।
तन्माध्वं मतमेवाभूद्विद्वन्मुकुटवर्धनम्॥17॥

| |
|---|
| बहुजीवमते मानमस्ति चेदेकतैषु न।<br>न चेदप्रमाणिकं तत्कथं बुद्धिमतो मतम्॥ 18॥ |
| एकजीवमते मानमस्ति चेद्बहुतैषु न ।<br>न चेदप्रामाणिकं तत्कथं बुद्धिमतो मतम्॥ 19॥ |
| यदि मानविरुद्धं तद्बुद्धिमान्न मतं वदेत्।<br>यच्चाप्रामाणिकं तच्च बुद्धिमान्न मतं वदेत्॥ 20॥ |
| कथं विरुद्धपक्षौ द्वावेकोऽङ्गीकुरुते बुधः।<br>सच्चासच्च कुतो ब्रह्म जगद्वा नोच्यते त्वया॥ 21॥ |
| अतस्त्वमेव न हतो मते चेमे हतो मिथः।<br>पृथक्श्रमोऽत्र तद्यर्थः को मृतं मारयेद्बुधः॥ 22॥ |
| सुन्दोपसुन्दौ हन्तु प्राग्ब्रह्मा चक्रे तिलोत्तमाम्।<br>भाविब्रह्मा त्विमौ हन्तु चक्रे युक्तितिलोत्तमाम्॥ 23॥ |
| यद्यैक्यं ब्रह्मणि तदा तेनैवैक्यकथा गता। |
| नाधारएव ह्याधेयं भेदोऽवश्यं ततस्तयोः॥ 24॥ |
| निर्विशेषं हि ते ब्रह्म न विशेषोऽस्ति कश्चन। |
| तद्धर्मधर्मिता चैकरूपता च न ते मते॥ 25॥ |
| उपचारेण तत्तत्रेत्युक्ते यदि तदा नरे।<br>सिंहत्वमिव तत्रैक्यं नास्त्येवेत्यापतेद्भिदा॥ 26॥ |

मिथ्या चैक्यमश्रुत्तत्ते सर्वज्ञत्वादिधर्मवत्।
निर्धर्मके कथं धर्मो वृथैवासीद्भ्रमस्तव॥27॥

यदि ब्रह्मैव चैक्यं स्यादेकं न स्याद्धि तत्तदा।
ऐक्यं रूपं तदेकत्वं स्यान्नैकं विदुषां मते॥28॥

एकमेवेति या वाक्ते साऽभूद्धि ब्रह्मणो बहिः।
ततो ऽप्यैक्यं नैव भवेत्प्रमाणाभावतस्तव॥29॥

किञ्चैकमेवेति वाग्वदैक्यमेवेति वाक्व ते।
ऐक्यस्य ब्रह्मणैक्यं तन्निर्मूलमिति मे मतिः॥30॥

जलमेवान्नमित्युक्ते यथान्ने नास्तिता भवेत्।

ब्रह्मैक्यमिति च प्रोक्तेप्यैक्यं नास्तीति धीर्भवेत्॥31॥

विरुद्धधर्मधर्म्यैक्यमतिर्न्न स्याद्धि धीमतः।

न चेद्गुणैकतावादमङ्गीकृत्य गुणान्बहून्॥32॥

कृतो नाङ्गीकरोष्यज्ञ पक्षपातादधः पतेः।

यद्यद्वितीय श्रुतित एवैक्यस्य तदेकता॥33॥

तर्हि सर्वज्ञपूर्वाणां धर्माणं च तदेकता।
तत एव भवेन्मन्द ते न स्युश्चेदिदं च न ॥34॥

एकदैकविधं वाक्यं सहोक्तामर्थमण्डलीम्।
साधयेद्वा बाधयेद्वा द्वैविध्यं न हि सिद्ध्यति॥35॥

| |
|---|
| प्रतियोग्यनुयोग्यादिसापेक्षैक्यं भवन्मते। |
| निरपेक्षे निर्विशेषे ब्रह्मण्येकीभवेत्कथम्॥36॥ |
| किं च ब्रह्मगुणद्वैतनिषेधादपि तद्वचः।<br>द्वैताभावाख्यमैक्यं ते ब्रह्माधिकरणं वदेत्॥37॥ |
| न यस्येति नञर्थस्य योगोह्यत्र प्रतीयते।<br>न तु तद्रूपतामाह नह्य भ वोऽद्य नः पुमान्॥38॥ |
| अत एव ह्यभावस्य द्वैतमित्यपि ते मतम्। |
| तद्ब्रह्मधर्मितैक्यस्य सिद्ध्येन्न तु तदेकता॥39॥ |
| अद्वैतमेव स्वद्वैतं यतो ब्रह्मण्यसाधयत्। |
| सर्वाद्वैतमतं तस्मात्स्वव्याहतमभूत्तव॥40॥ |
| एवं निर्गुणतावाणी निर्गुणं ब्रह्मचेद्वदेत्। |
| तदा शाब्दत्वमेयत्वनिर्गुणत्वादयो गुणाः॥41॥ |
| ननृतुर्ब्रह्मणि परे नचेन्मानबहिष्कृतम्।<br>न सिद्ध्येन्निर्गुणत्वं ते सर्वज्ञत्वादयो गुणाः॥42॥ |
| स्वमानवेद्याशाब्दत्वमेयत्वादिगुणैः सह।<br>धिक्कृत्य निर्गुणत्वं ते नृत्यन्ति विगतज्वराः॥43॥ |
| एवं चोभयतः पाशारज्जुं सङ्गृह्य ते मतम्। |
| प्रविश्य व्याहतिस्त्री मा भैषीरित्याहनश्श्रमूम्॥44॥ |

| |
|---|
| स्वावेध्यब्रह्मणैक्यं च यद्यैक्यस्य निगद्यते।<br>अहं ब्रह्मेत्यादिवाचस्त्वद्रीत्यैवाखिला अपि॥45॥ |
| ब्रह्मस्वरूपतै(मै)क्यं ते न ब्रूयुरिति मे मतिः। |
| यमर्थं मनसा ध्यायेत्तमेवार्थं वदेत्किल॥46॥ |
| स्वावेद्या चित्स्वात्ममात्रमैक्यं द्वेधापि नोल्लिखेत्। |
| ब्रह्मभिन्नैक्यवादेपि नैक्यमानमिदं भवेत्॥47॥ |
| स्वावेद्यस्याहमित्युल्लेखस्यैवाभावतस्तव।<br>जडाहङ्कारवाचस्ताः सर्वा वाच्यास्त्वयैव तत्॥48॥ |
| जडैक्यं च न ते पक्षे तेनैक्यश्रुतयः क्व ते।<br>भज वा स्वप्रकाशोक्तेर्निजमर्थं श्रुतीरिमाः॥49॥ |
| त्यज वा व्याहतिस्त्रीणां सृज वा हृदि मन्दिरम्।<br>तस्मादीदृङ्मतं युक्तिविरुद्धं सद्विगर्हितम्॥50॥ |
| को विद्वान्मनयेद्विद्वत्सभां प्रत्यानयेच्च कः।<br>निर्गुणश्रुतितश्चित्वमपि नो चेदचित्तनु॥51॥ |
| जडं ब्रह्म भवेन्मूढ तेनैक्ये च न नः क्षतिः।<br>चित्वाभावेपि चित्तच्छेच्छृङ्गं तत्वं च शृङ्गभूः॥52॥ |
| शूद्रत्वोक्तेश्च शूद्रोऽभूः पशुत्वोक्तेः पशुर्ह्यभूः।<br>ऐक्याविरोधिधर्माणां बाधिका सा नचेत्तदा॥53॥ |

एकत्र भग्नदन्तेयं कथं धर्मान्तरं दि(द)शेत्।

सर्वं ब्रह्मेति वाचोक्तसर्वैक्यस्य च सिद्धये॥54॥

सर्वधर्मेत्युक्तसर्वजगद्धर्मांश्च न क्षिपेत्।

अतः पटत्वकुड्यत्वघटत्वाश्मत्वपूर्वकैः॥55॥

धर्मैश्च सहितं तस्यात्परं सद्धर्मतो बहिः।

यदि श्रौतं जडैक्यं च रक्ष्यं नाध्यक्षरोधतः॥56॥

तर्हि दुःखौघभरितजीवैक्यं च न रक्ष्यताम्।

ब्रह्मनिर्गुणतावाक्ते न हि जीवगुणान् क्षिपेत्॥57॥

ऐक्योक्तिबलतस्तच्चेत्सिद्धं हन्याज्जडेष्वपि।

उपचारोऽत्र ते कस्मादपचारः प्रभौ तव॥58॥

माश्रूस्त्वं प्रस्तरो मन्द मा च माणवकोऽनलः।

किं च सर्वमिदं ब्रह्म खल्वित्याह हि या श्रुतिः॥59॥

सा मायिभिर्बलान्नीता श्रुत्वा तस्य दुरागमम्।

स्वनाशाच्च जगन्नाशाद्भीतेत्थं पर्यचिन्तयत्॥60॥

सर्वश्रुतेरसङ्कोचो जडैक्यान्न भेवेत्किल।

एकस्मिन्सर्वताऽयोगात्सङ्कोचोप्यस्य नार्थकृत्॥61॥

एकजीवमतस्य स्यादर्थः कोऽपि न मेऽभवत्।

बहुजीवमतेप्येकब्रह्मणो बहुनैकता॥62॥

न स्याद्ब्रह्मगतैकत्वत्यागे ब्रह्मद्विताऽऽपतेत्।
जीवस्य बहुतात्यागे सर्वशब्दः प्रकुप्यति॥63॥

अत्यागेतु विरुद्धैक्यं कस्य वा स्याद्विवेकिनः।
एकैको मुच्यमानोऽद्य सर्वशब्देन नोच्यते॥64॥

तत्पुञ्जीकरणायोगात्सर्वत्वं स्यात्कदा वद।
एकत्वारूपमोक्षोऽसौ पुञ्जताभञ्जको नु किम्॥65॥

एकैकवस्तुगणकाश्चान्ते तं वस्तुसञ्चयम्।
वदन्ति सर्वशब्देन न क्वाप्येकस्य सर्वता॥66॥

एकैकनाशे सर्वं च नष्टमित्यपि यद्वचः।
तच्च पुञ्जीभूततत्तन्नाशेष्वेवाऽऽह सर्वताम्॥67॥

प्रतियोगित्वसम्बन्धादभावानुगतैव सा।
उपचारेण तत्रापि प्रोच्यते न तु मुख्यतः॥68॥

बहुत्वाख्यगुणव्याप्ता नष्टेषु न हि सर्वता।
एकैकवस्तुनिष्ठैः प्रागेकत्वाख्यगुणैः किल॥69॥

त्रिभिर्वा चतुराद्यैर्वा बहुता तेषु वस्तुषु।
जायते बहुतायास्तु या पर्याप्तिः स्थले स्थले॥70॥

तां तां सर्वपदेनाहुः सन्तः शब्दार्थवेदिनः।
तद्बहुत्वसमव्याप्तं सर्वत्वं न हि संशयः॥71॥

| |
|---|
| अभावेषु गुणाभाववादो येषां हि वादिनाम्।<br>बहुत्वैकत्वपूर्वोक्तिस्तेषां तत्रोपचारिकी॥72॥ |
| गुणैः समं नष्टभावेष्वभावेषु च यद्गुणाः।<br>न सन्ति तेन ते शब्दा मुख्यतो नेति तन्मतम्॥73॥ |
| अनष्टार्थेषु सर्वत्वबहुत्वाद्यं हि कोविदैः।<br>पुञ्जीभूतेषु  तेष्वेव प्रोच्यते बहुवस्तुषु॥74॥ |
| एकस्मिन्सर्वशब्दस्तु न लोके नाप्यलौकिके।<br>अस्य त्वेकैकमोक्षेऽपि बहुत्वं तु चितामपि॥75॥ |
| एकेन ब्रह्मणैकत्वमाप्तानां न हि युज्यते।<br>तस्मादेकैकमुक्तौ च सर्वं ब्रह्मेति मे गिरः॥76॥ |
| अर्थं किन्निष्टबहुतामादाय घटयाम्यहम्।<br>ऐक्याख्यमोक्षोप्येकोऽस्य तत्रापि बहुता न हि॥77॥ |
| बहवो ये भवध्वंसास्तेपि सर्वैक्यवादिनाम्।<br>ब्रह्मणैकत्वमाप्ताश्चेन्नैव स्युर्बहुतोचिताः॥78॥ |
| असत्वे तु पृथक्तेषां नितरां बहुतोचिता।<br>सर्वं ब्रह्मेत्यादिगिरा तदैक्यं को वदेद्बुधः॥79॥ |
| अभावद्वैतवादे ते बहवो नैकतोचिताः। |
| जडत्वात्सुबहुत्वात्तैरनङ्गीकरणादपि॥80॥ |

| |
|---|
| अतो मे सर्वशब्दोऽयं नैव गच्छेत्तदध्वना।<br>मुख्यार्थस्य परित्यागः शब्दायास्मै न रोचते॥81॥ |
| मुख्यार्थत्यागिनीं मां च हसेयुः सर्वसज्जनाः।<br>क्वाप्येकत्वाभावमेव ब्रूयुः सर्वपदादयः॥82॥ |
| तथा बहुत्वाभावं च क्वचिदेकपदं व्रजेत्।<br>अमुख्या लक्षणाख्यासौ वृत्तिस्तवतु सापि न॥83॥ |
| यतोऽत्यन्तविरुद्धौ तावभावौ चैक्यरोधिनौ।<br>निर्विशेषा ब्रह्मचित्ते जैवी चिदपि तादृशी॥84॥ |
| अतः कस्य बलाद्वा सा बहुता चैकता वद।<br>तद्भेदस्यैव बलतो वाच्या तासां द्विरूपता॥85॥ |
| भेदेनैक्यं ततस्त्यागे सर्वोक्तेर्नास्ति गोचरः।<br>अतः सर्वप्रकारैश्च ममार्थं व्यर्थयत्ययम्॥86॥ |
| ममैव नाशकस्यास्य न चित्रं मेऽर्थनाशनम्।<br>एकजीवमते सर्वशब्दः स्वार्थं यथा जहौ॥87॥ |
| बहुजीवमतेऽप्यस्य शब्दस्यार्थो न लभ्यते।<br>अतो ब्रह्माऽस्य नार्थोऽभूदेकत्वैकस्वभाववत्॥88॥ |
| ऐक्यार्होऽन्योऽपि नार्थोऽभूदेकत्वैकस्वभाववान्।<br>यदा सर्वविमोक्षः स्यात्तदाप्युक्तेन वर्त्मना॥89॥ |

| |
|---|
| रुन्धे पदद्वयं मेऽन्ध बहता चैकतापि ताम्।<br>अतोऽद्याशब्दतोऽर्थं वा कथं गच्छामि तेऽध्वनि॥90॥ |
| अहमर्थार्थिनी वाणी त्वं तत्वघ्नः पदे पदे।<br>इत्थं सर्वब्रह्मतोक्तिरर्थाभावोत्तरोषतः॥91॥ |
| प्रत्याक्षिपन्निषेधार्थं खलूक्त्या मायिनां मतम्।<br>किं च पक्षान्तरापेक्षी पुनर्नः स्पर्शने पदे॥92॥ |
| पदाभ्यामेव हन्मि त्वां पश्याद्य मम पौरुषम्।<br>महावाक्यस्य पदयोरर्थः सत्यस्तवापि हि॥93॥ |
| तन्मिथ्याभूतबहुतापक्षोप्यत्र न शोभते।<br>मुख्ययोर्धर्मिपदयोरर्थे नामुख्यतोचिता॥94॥ |
| अविभक्त्यन्तधर्मार्थविभक्त्यर्थस्य तूचिता।<br>अतो विभक्त्यर्थभूतमैक्यं त्यक्त्वा सदृक्षताम्॥95॥ |
| जीवेष्वेव वदेद्वाक्यं यज्वप्रस्तरवाक्यवत्।<br>पदाभासाभासतायां न कस्यापि भयं भुवि॥96॥ |
| छेदस्तु मुख्यपदयोः शिरच्छेदायितो नृणाम्।<br>किञ्च मुख्यार्थबाधे स्याल्लक्षणा नान्यथा किल॥97॥ |
| विरुद्धधर्मिणोर्जीवब्रह्मणोरेकतैव ते ।<br>मतेपि बाधिता मन्द मम त्वत्यन्तबाधिता॥98॥ |

| |
|---|
| तद्बाधितविभक्त्यर्थं चिन्धि व्यत्यन्तरासिना।<br>अबाधितार्थछेदस्तु न योग्यो नापि ते हितः॥99॥ |
| यो दोषी तस्य नरको दृष्टो  नैव त्वदोषिणः।<br>पदद्वयार्थत्यागे च जीवानां ब्रह्मणैकता॥100॥ |
| न सिद्ध्येच्चिच्चिदित्येव ह्युक्तं स्यात्तेन किं फलम्।<br>मुख्यार्थे सत्यमुख्यार्थो नैवार्थ्यः किलधीमताम्॥101॥ |
| अतः श्रुतिः स्वमुख्यार्थलाभायेत्थमचिन्तयत्।<br>बहुता धर्मिषु गताऽत्याज्याकारगुणादिकान्॥102॥ |
| समानपि हितान्सर्वान्भिन्नत्यामरणं मिथः।<br>नाभेदमात्रं सहते किं पुनस्तद्विलक्षणान्॥103॥ |
| यथा पटस्था बहुता घटस्यान्यत्र च स्थिता।<br>मरणे सति यद्भस्म तच्चान्योन्यं भिनत्ति हि॥104॥ |
| तद्धर्मिनिष्ठबहुता स्वभावोऽयमद्भूद्बलात्।<br>एवं चानादितो भिन्नस्वभावाद्भिन्नकर्मणः॥105॥ |
| अणूञ्जीवगणान्स्वस्वधर्माधारन्स्वधर्मिणः।<br>तवाप्यभिमता तेऽथ बहुता लोकसम्मता॥106॥ |
| मिथश्च ब्रह्मणश्चैतान्न भिनत्ति कदा वद।<br>कथं चातिविरुद्देन ब्रह्मणैषामभिन्नताम्।107॥ |

| |
|---|
| नरुणद्धि महत्तद्धि सर्वज्ञं सर्वकर्तृ च।<br>एवं चातिविरुद्धैक्यमिदं वक्तुं कथं यते॥108॥ |
| अतोऽन्यं लोकमान्यं च कञ्चनार्थं वदाम्यहम्।<br>इति श्रुतिर्विनिश्चित्य पुनश्चार्थमचिन्तयत्॥109॥ |
| इदं सर्वं पदं सर्वनामत्वान्न कचिद्दृढम्।<br>यत्रेच्छा तत्र गच्छेद्धि तत्पूर्वत्रोत्तरत्र च॥110॥ |
| प्रस्तुतं भगवद्धर्मनिजरूपमनन्तकम्।<br>अनुच्छेदं सर्वमिति ब्रह्मेत्याह तदेकताम्॥111॥ |
| तेष्वेव बोधयन्ती सा वोचेद्दोषस्य नौषधम्।<br>धर्मनिष्ठा तु बहुता धर्मिणैक्यं न बाधते॥112॥ |
| भेदाभेदमते धर्मधर्म्यैक्यस्यापि सम्मतेः।<br>यथा रूपरसादीनां बहुता स्वस्वधर्मिणा॥113॥ |
| एकेनाप्यैक्यमस्त्येव तवापि च ममापि च।<br>तथेहापि भवेदेव यदद्दृष्टं च दृष्टवत्॥114॥ |
| सामानाधिकरण्यं च धर्माणां धर्मिणा सह।<br>नीलोत्पलादिवाक्येषु यद्दृष्टं तेन का क्षतिः॥115॥ |
| दुष्टानुसारः सर्वस्य निर्वाहकशिरोमणिः।<br>इयांस्त्वत्र विशेषोऽस्ति नेह नानेतिमानतः॥116॥ |

| |
|---|
| भेदासहिष्णु ब्रह्मैक्यं तद्धर्माणामभूद्बलात्।<br>धर्मधर्मिस्वभावेनैवाधारधेयता भवेत्॥117॥ |
| यत्समर्था हरेर्धर्मा धर्मी चासौ महाप्रभुः।<br>कदाप्यभावस्याभावस्तत्स्वभावानुभावकः॥118॥ |
| तथाऽवयवनिष्ठा या बहुता सा च देहतः।<br>एकस्मादप्यनेकेषां तेषामैक्यसहा किल॥119॥ |
| अतोऽपि भगवत्पादजानूरुकटिपूर्वकम्।<br>हस्तमस्तकनेत्राद्यं सर्वं ब्रह्मेति वा मम॥120॥ |
| अर्थोऽस्तु तेऽज्ञ कप्यासं पुण्डरीकमिवाक्षिणी।<br>इत्यादौ प्रस्तुतास्तस्मादिदन्ताहार्श्च तेऽखिलाः॥121॥ |
| सर्वलोकविरुद्धार्थं कोऽर्वाचीनो वदेद्वद।<br>विशेषशक्त्या सर्वत्वबहुत्वानन्ततादिकम्॥ 122॥ |
| यद्यभिन्नावतारेषु यो ब्रूते तन्मतं भजे।<br>स्थानभेदोत्थतद्भेदं निरोद्धुं व्यासशिक्षया॥123॥ |
| तद्रूपवृन्दमखिलं तन्मतप्राप्तमेव हि।<br>इदमित्यनूद्य सर्वं च ब्रह्मेत्येव ब्रवीम्यहम्॥124॥ |
| अथवा रूपजातं तद्विष्णुवामनपूर्वकैः।<br>तदसाधारणैः शब्दैर्विद्वन्मात्र प्रसिद्धिभिः॥125॥ |

अग्निवाय्वादिशब्दैश्च प्रतिपाद्यं पदे पदे।

यतश्च श्रुतिमानिन्या लक्ष्म्या मम तदाज्ञया॥126॥

मानिन्याश्च दृशा सर्वं सर्वदाऽत्रैव दृश्यते।

तस्मादिदंपदार्हं तद्वृन्दं सर्वं च पूर्ववत्॥127॥

श्वश्र्वा लक्ष्म्याः स्नुषायास्तु मम वा दृष्टिगोचरम्।

अनूद्य सा वा ब्रह्मेति स्तौति स्तौम्यहमेव वा॥128॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः।

द्वितीयः सुधियां कण्ठालङ्कारं कुरुतेतराम्॥129॥

श्रीः ॥ इति श्रीमद्वादिराजपूज्यविरचितन्यायरत्नावल्यां द्वितीयः सरः॥1-129॥ श्रीः

## तृतीयः सरः ॥3-119॥

कथं चैकचितोपि स्यादेकब्रह्मचितैकता।

एकत्वद्वयजं तद्धद्वित्वं किन्न रुणद्धि ताम्॥1॥

त्वयोरैक्यकथायां हि द्वित्वापेक्षा यतो ध्रुवा।

अपेक्षाबुद्धिनाशेनाप्यस्य नाशो न तद्भवेत्॥2॥

जहती चाप्यजहती पदयोर्लक्षणा यदा।

तदापि च द्वयं ताभ्यां पदाभ्यां ध्रुवमुच्यते॥3॥

द्वितामनूद्यैक्यमेव यदि वाक्येन बोध्यते।

मुण्डितैक्येन्ययोर्वैक्ये तत्तदैक्ये च बोधिते॥4॥

नार्थसिद्धिस्तवापि स्यान्नाऽप्यनर्थो भवेन्मम।
तत्त्वंपदोक्तचिन्मात्र द्वितयस्य  परस्परम्॥5॥

ऐक्यं जेद्बोध्यते तर्हि द्वित्वबोधोप्यभृद्बलात्।
पदाभ्यामुपलक्ष्यत्वपक्षो विशोभकृत्तव॥6॥

ताभ्यामप्युपलक्ष्यैक्ये न कोप्यतिशयो यदि।
तर्ह्युक्त एव दोषः स्याद्यदि व्यावर्तके पदे॥7॥

ब्रह्ममात्रगतादैक्याज्जीवमात्रगतादपि।
व्यावर्त्यैक्यमिदं द्वैक्यं कुरुतश्चेद् द्विताप्यभूत्॥8॥

न चेत्प्रागुक्तदोषः स्यान्न स्यात्तव मनीषितम्।
महावाक्यार्थतातस्मात्त्वप्रीत्यैव तयोर्ध्रुवा॥9॥

एकैकैक्यं च तन्नाभूद्ब्रह्मैक्यं नितरामभूत्।
हाहन्तपङ्के पतितमुद्धर्तुं कोऽस्ति पण्डितः॥10॥

किंवानुवादोऽपि तदादूष्यो यदि निषेधनम्।
निषेधस्य त्वभावेसावनुवादोऽपि वादवत्॥11॥

गामानयेत्यादिवाक्येष्वनूद्यागौरगौर्नहि।
यद्यैक्यमेव द्वित्वस्य निषेध इति मन्यसे॥12॥

कार्यकारणरूपत्वाद्गुणत्वादुभयोरपि।
द्वित्वाभावानात्मकं तत्कथं द्वित्वं निषेधति॥13॥

| |
|---|
| अर्थाच्च बाधकं नैक्यं यद्वित्वत्वेन सहस्थितम्।<br>सहानवस्थिते गोत्वाश्वत्वादौ स्यादियं गतिः॥14॥ |
| इहत्वसावहमिति यदैक्यस्य प्रमा भवेत्।<br>अपेक्षाबुद्धिजं द्वित्वमपि तत्र तदैव हि॥15॥ |
| एकाभावेन निधता यत्सत्ता तेन तत्परम्।<br>सहानवस्थितं प्राहुर्नात्विमे यत्सहस्थिते॥16॥ |
| अन्यथा मुञ्डितैक्यं तन्मुण्डयोर्द्धि शिरस्तव।<br>एवं चेद्वित्वमप्ये तत्कथमैक्यमिदं क्षिपेत्॥17॥ |
| इति चेच्छङ्कसे सत्यं शङ्केयं न भयङ्करी।<br>नाहं करोम्यहं क्वापि नत्वां च त्वं करोम्यहम्॥18॥ |
| त्वं च नाहं कुरु सदा ममत्वं कुरु संसदि।<br>वाग्धेनुः पश्य नानार्थान्दोग्धी स्वर्धेनुवन्मम॥19॥ |
| इमां रम्यतमां ध्यापयन्भ्रमं नैमि श्रमं च न।<br>अपेक्षा बुद्धिजं द्वित्वमप्यैक्यप्रत्ययायते॥20॥ |
| यतो युक्तिबलात्प्राप्तं तत्सहैव स्थितिर्ध्रुवा।<br>सहस्थितमिदं द्वित्वं विरुद्धाकारधर्मिणोः॥21॥ |
| मुख्यत्वात्सिंहनरयोरिव मुख्यैक्यमोचकम्।<br>सामानाधिकरण्याच्च सादृश्यैक्य सहस्थितम्॥22॥ |

| |
|---|
| यदि चैकीभूतराम कृष्णादिभगवत्तनौ। <br> ऐक्यस्यैव प्रत्ययायद्वित्वापेक्षां च शङ्कसे॥23॥ |
| तत्रापि नित्यसमयोस्तयोर्वैषम्यमूलभूः। <br> अत्युग्रमेतद्-द्वित्वं न तत्कस्यैक्यसहस्थितिः॥24॥ |
| द्वित्वं च द्विविधं दृष्टं मुख्यं चामुख्यमेव च। <br> तथैवैक्यं द्विःप्रकारं मुख्यामुख्यतयैव हि॥25॥ |
| पृथुबुध्नोदराकारो यो घटस्तद्विलक्षणः। <br> यश्चातानवितानात्मा पटस्तद्वातु याद्विता॥26॥ |
| मुख्यासाभेदसचिवा मुख्यैक्यं न तयोर्द्वयोः । <br> कदापि सहते सैच मुख्यैक्यक्षपणक्षमा॥27॥ |
| सादृश्यैक्यं तु सह ते द्रव्यत्वाद्यैः स्वधर्मिणः। <br> यत्रैक्यं रामकृष्णादिभगवद्रूपयोर्द्वयोः॥28॥ |
| नेह नानेति मानोक्तं तन्मुख्यैक्यं विदुर्बुधाः। <br> तच्च मुख्यद्वितां क्षेप्तुमलं या भेदसाधिका॥29॥ |
| अभेदसचिवां कां चिद्वितां केनचिदर्पिताम्। <br> सहते तद्बलादेव तयोरैक्यप्रमा किल॥30॥ |
| यथा भेदप्रतिनिधिर्विशेषो विष्णुमूर्तिषु। <br> द्वित्वादिप्रतिनिध्यान्यद्वित्वाद्यं तद्वदस्ति हि॥31॥ |

| |
|---|
| इदमैक्यसहं तत्तु भिनत्त्यैक्यं स्वधर्मिषु।<br>बह्वपमोभूदिति वागिहमानं महात्मनाम्॥32॥ |
| यदीदं मुख्यमैक्यं स्यात्तदा द्वित्वं गतं मम।<br>यदि मुख्या द्वितेयं स्यात्तर्ह्यैक्यं ते प्रमर्दयेत्॥33॥ |
| तद्बलाबलचिन्तायां यो बलीयान्स जेष्यति।<br>यः सर्वज्ञ इति श्रुत्या सर्वज्ञत्वं हरौ श्रुतम्॥34॥ |
| तान्यहं वेद सर्वाणीत्याह तत्र स्मृतिश्चतत्।<br>तन्मूलीभूतभगवत्प्रत्यक्षं च तदीक्षते॥35॥ |
| जीवेष्वल्पज्ञता तत्तत्प्रत्यक्षेण निरीक्ष्यते।<br>नत्वं वेत्थेति गीता च जीवेष्वल्पज्ञतां जगौ॥36॥ |
| अनादिमायया सुप्त इत्यज्ञत्वं श्रुतिर्जगौ।<br>यो विद्ययान्ध इति च प्रोक्तं भागवते च तत्॥37॥ |
| नित्यमुक्तत्वबद्धत्वयुक्त्या चा नुमिते हि ते।<br>इत्यादिमानशतकैरत्युपोद्बलितं मम॥38॥ |
| द्वित्वं वा मुख्यतामर्हेत्सर्वैरेतैः प्रमर्दितम्।<br>सहायशून्यमैक्यं वा मुख्यं स्याद्बुधसंसदि॥39॥ |
| अद्याप्यसिद्धं सन्दिग्धमैक्यमध्यक्षबाधितम्।<br>मानानीमानि तत्सिद्धविरुद्धाकारमेतयोः॥40॥ |

| |
|---|
| भेदं च भेदसचिवं मुख्यं द्वित्वं कथं क्षिपेत्।<br>किन्तु द्वित्वमिदं व्याघ्रवदनोग्ररदोपपमम्॥41॥ |
| मुख्यैक्यहरिणीं तेऽङ्ग भक्षयेन्नात्र संशयः।<br>श्रौततत्वं पदद्वन्द्व सामानाधिकरण्यतः॥42॥ |
| अमुख्यैक्याख्यशशकशिशुकं शोषयेत्परम्।<br>अनुवादबलं पश्य यस्याग्रे मूकता द्विषाम्॥43॥ |
| अत एव द्वासुपर्णेत्यादौ मुख्यैक्यखण्डने।<br>जीवेशयोर्द्वित्वमेव श्रुतिर्युक्तिमचीकथत्॥44॥ |
| तस्मान्नीचोच्चचिन्निष्ठद्वितयं बलवत्तरम्।<br>मुख्यैक्यं मोचयेत्साद‍ृश्यैक्यं च स्थापयेद्बलात्॥45॥ |
| निर्विशेषब्रह्मवादे भगवद्रूपयोरपि।<br>विशेषोपहितद्वित्वाभावादैक्य कथा गता॥46॥ |
| अन्यत्र च द्वित्वसत्व मर्दितैक्यशिशोस्तव।<br>गर्भस्रावेणैव नाशा दासीदैक्यं न कस्य चित्॥47॥ |
| तद्वृद्धिमिच्छतो मूलहानिर्हन्ता भवत्तव।<br>भेदासहिष्णु यदभूदैक्यमेवाष्टमो रसः॥48॥ |
| किञ्चानादिरयं वेदः स्याद्धि ब्रह्मलयेष्वपि। |
| अहमादिपदार्थस्तु कस्तदा स्याद्विचारय॥49॥ |

| |
|---|
| पुंयोगो नास्ति नित्येऽस्मिन्यस्तु वक्ताऽऽदितः पुमान्।<br>अहमादिपदार्थश्च स एवेति मतिर्मम॥ 50॥ |
| वेदः सर्गे लये चास्ति तस्य सर्गलयादिषु।<br>यः स्थातासोनुसन्धाता स एवार्थो भवेद्ध्रुवम्॥ 51॥ |
| शब्दार्थौ यत्समौ प्राहुस्तन्मुख्यार्थौ परोस्य न।<br>नारायणाज्जगन्नाथात्स्मृतिश्चाह तमेव हि॥ 52॥ |
| मां विधत्तेऽभिधत्ते मामित्याद्यां श्रुतिसम्मता।<br>वेदश्च शब्दराशीनां स्पष्टं मुख्यार्थरूपिणम्॥ 53॥ |
| तस्माद्ब्रह्माहमित्यादि वाक्यस्थाहपदोदितः।<br>स एवाभूत्तस्य मुख्यमैक्यं चास्तु न मेक्षतिः॥ 54॥ |
| द्विता तदा त्वमुख्या तु योग्यं योग्येन युज्यताम्।<br>तद्वाक्यस्यानुवक्तारस्तद्दृष्टागमदर्शिनः॥ 55॥ |
| अनित्या नित्यवेदस्थपदार्थाः स्युः कथञ्चन।<br>हर्याज्ञया त्वमुख्यार्थास्ते मुख्यैक्यस्य नोचिताः॥ 56॥ |
| माभूद्यः पूर्वकल्पेर्थो भाविकल्पे भवेच्च न।<br>मध्ये तस्यार्थता या तु सा तुच्छेति मतिर्मम॥ 57॥ |
| सर्वराज्याधिपो राजा तत्त्वान्यमधिकारिणम्।<br>एकैकांशेषु कुरुते हरते च निजेच्छया॥ 58॥ |

महाराजस्य वा राज्यं त्यक्तदत्तपदस्य वा।
इतोऽप्यहं ब्रह्मतोक्तेरर्थो नागन्तुको मुनिः ॥ 59 ॥

योऽभूत्पूर्वलयेप्यर्थो योऽर्थो भाविलये भवेत्।
मध्ये तस्यैवाथर्ता या सायुक्तैवेति मे मतिः ॥ 60 ॥

यदा मुख्यार्थयात्रायां प्रेरयेत्स्वं पदद्वयम्।
तदा मुख्यैक्यमेव श्रीर्वक्तिप्राणेशरूपयोः ॥ 61 ॥

पतिव्रताशिरोरत्नभृता द्विपति शङ्कया।
यदा तु मुनिनान्येन गृहोतैकपदाभवेत् ॥ 62 ॥

मुख्यैक्यं न तदा दद्याद्धध्याध्यादृशतादृशम्।
स्वपुत्रमुनिनाभर्तुरैक्ये पुत्राङ्गसङ्गिनी ॥ 63 ॥

भवेयमिति भीतासीन्निरवद्यशिरोमणिः।
विशेषशक्त्या प्राप्तं यद्द्विद्धत्वमैक्यसहिष्णु च ॥ 64 ॥

हरिरूपेष्वभेदोक्त्यै तदगत्या सहायकृत्।
इहत्वतिविशेषोऽस्ति यो भेदस्यैव साधकः ॥ 65 ॥

अपूर्णत्वसुपूर्णत्वविभुत्वाणुपत्वपूर्वकः।
सोऽयं स्वधर्मिणोर्जीवपरयोरेकरूपताम् ॥ 66 ॥

ऐक्यानुगं विशेषं च द्वित्वं चैक्योपमर्दितम्।
बहिष्कृत्यात्यन्तभेदं द्वित्वं च बलवत्तरम् ॥ 67 ॥

| |
|---|
| स्थिरीकृत्योपपत्तित्वाच्छ्रुतिमर्थान्तरे क्षिपेत्।<br>अपि चा नादितो देहि देहेष्वेव स्थितापि या॥68॥ |
| भवजक्लेशराशीनामुच्चाटनपटीयसी।<br>अनश्नन्नन्य इत्युक्तदुःखाऽभोक्तृत्वतः सदा॥69॥ |
| अभितश्चाकसीतीति तस्यामेवर्चिया स्तुता।<br>मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि॥70॥ |
| न हन्यते देहगतोऽपि योदुःखैर्न दैहिकैः।<br>क्व शोकमोहौ स्नेहो वा भयं वायेऽज्ञ सम्भवाः॥71॥ |
| क्व चाखण्डितविज्ञानज्ञानैश्वर्यैश्वरोऽजितः।<br>एवं भागवते पार्थनारदाद्यैश्च या स्तुता॥72॥ |
| ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।<br>भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥73॥ |
| इत्थं गीतासु च प्रोक्ता यास्तुतेव स्थले स्थले।<br>स्वभावादेव सा ब्राह्मी चित्समर्था न संशयः॥74॥ |
| जीवीचित्वखिलक्लेशराशीनात्माप्रियानपि।<br>अनादितोऽपि या भुङ्क्ते तयोरन्य इति श्रुतौ॥75॥ |
| यात्तीत्युक्ता सा स्वभावादसमर्था न संशयः।<br>चिन्मात्राश्रितमज्ञानमुपाधिः किल ते मते॥76॥ |

| |
|---|
| प्रतिबिम्बे पक्षपातस्तस्येत्यपि मतं तव।<br>प्रतिबिम्बं च जैवी चित्तस्मादज्ञानसम्भवम्॥77॥ |
| दुःखं च जीवचिद्भोग्य न तु योग्यं जडेशयोः।<br>कथं चित्स्वामिता दुःखे न स्याज्जीवचितो यदि॥78॥ |
| न प्रेरयेत्तदा स्वोरस्ताडनाय करौ स्वकौ।<br>मिथ्याभूता च दुःखस्य भोक्तृता न चितो यदि॥79॥ |
| तर्हि नास्याविरक्तिः स्यान्मुक्त्यै च न यतेत सा।<br>सामानाधिकरण्यं च नस्याद्बन्धविमोक्षयोः॥80॥ |
| त्वन्न्यायादपि स मथ्र्या सामाथ्र्यै तच्चितोर्द्वयोः।<br>दुःखं च दुःखहेतुं च देहान्तः करणादिकम्॥81॥ |
| अज्ञानपक्षपातं च ब्राह्मी चिदिव जीवचित्।<br>यतः स्वतोऽनादितोऽपि बहिष्कर्तुं न शक्नुते॥82॥ |
| अतः स्वभावादेवेयमसमर्था भवन्न किम्।<br>मायां व्युदस्यचिच्छक्त्येत्युक्ताज्ञानविधूननम्॥83॥ |
| अधूननं च चिच्छक्त्या तदशक्त्या च नान्यतः।<br>नर्ते त्वत्क्रियतेकिञ्चिदित्युक्तेश्वरसम्पदम्॥84॥ |
| जडेषु कः पुमान्कुर्याद्विना साङ्ख्यकुमारकान्।<br>अज्ञानस्यैव सामर्थ्याद्यदि जीवचितः सृतिः॥85॥ |

| |
|---|
| तथापि सा समर्थान यतोस्य वशमीयुषी।<br>तच्छक्तेश्च तिरस्कर्त्री नित्यमुक्तेश्वरस्य चित्॥86॥ |
| कथं नातिसमर्थाभूद्व्यर्थस्ते भूदुराग्रहः।<br>किञ्चानादि तवाज्ञानं यज्ज्ञानं साद्यपि क्षिपेत्॥87॥ |
| तज्ज्ञानं वा समर्थं स्यादज्ञानं वा विचारय।<br>असाध्य मोक्षदं ज्ञानं स्वतः सिद्धभवानुगात्॥88॥ |
| तवाज्ञानादपि महत्समर्थं चेति मे मतिः।<br>यदर्थयन्ते विबुधाः अबुधाश्च मुमुक्षवः॥89॥ |
| सर्वैरर्थ्यमिदं ज्ञानमसमर्थं कथं वद।<br>यद्भक्तिदं मुक्तिदं च तृप्तिदं च प्रभोः सदा॥90॥ |
| तत्समर्थतरं मन्ये मिथ्याऽज्ञानापहर्तृ च।<br>चोरस्य तम एवेष्टं तत्समर्थं वदेच्च सः॥91॥ |
| ज्ञानिनस्तु तम शत्रुं मानयन्ति दिवाकरम्।<br>ईदृग्ज्ञानं च यच्चारुचरणस्पर्शतो महत्॥92॥ |
| चिद्रूपदेहकरणः स समर्थतमो हरिः।<br>अतो जीवचितोऽज्ञानं भवश्च ज्ञानमेव च॥93॥ |
| भवेयुर्यच्छितः सत्वात्सर्वोच्चोन्याश्रितोधमाः।<br>एवं चानादि संसारभावाभावोपपत्तये॥94॥ |

चितोरेवोच्चनीचत्वं स्वभावोयममूद्बलात्।
स्वभावस्य च नाभावो यद्भवेन्न कदापि तत्॥95॥

मुक्तौ चैकोदरे न्यस्य प्रवेशे सत्यदृश्यता।
क्षीरान्तस्थितनीरस्येव स्यान्नतुतदेकता॥96॥

एकतां च वदन्ती वाक् न भेदं हन्ति न द्विताम्।
एकांशग्राहि ते ज्ञानमन्यांशे न दयापरम्॥97॥

तथापि ब्रह्मणोन्यांशं जग्रास न कुतो वद।
यद्यज्ञानं परिच्छिन्नं व्याप्तान्यांशग्रहाक्षमम्॥98॥

व्याप्तस्य ब्रह्मशक्त्यैव तर्ह्यज्ञानमभृद्बहिः।
व्याप्तिनित्य सुखित्वाद्यैस्तदंशस्थबृहद्गुणैः॥99॥

रहितोणुः परिच्छिन्नाज्ञानस्य च वशं गतः।
अत एव सदा दुःखी जीवोंशोयं ततः पृथक्॥100॥

अणोरेव महत्वं च यतो नास्ति भवन्मते।
व्याप्त्यव्याप्ती सुख दुःख मायामायाविदूरता॥101॥

कथमेकस्य धर्माः स्युस्ततो मायैव ते रिपुः।
यतः सैव चिदंशौद्वाविमौ चक्रे पृथक् पृथक्॥102॥

ब्रह्मणोच्छिद्रता गुप्त्यैः यद्यंशोत्रापि मृग्यते।
तर्हि तादृश एवैको मृग्योंशो नत्वतादृशः॥103॥

| |
|---|
| नह्याच्छिद्रपटस्यांशो भिन्नाभिन्नस्वभाववान्।<br>नोचेत्सच्छिद्रमेवास्तु छिन्ननासापुटः पुमान्॥104॥ |
| ताम्रनासिक एव स्वं ब्रह्महास्यं न कारय।<br>अपि चान्तर्हृदि गतं भिन्नांशं न कुतः स्पृशेत्॥105॥ |
| तेऽज्ञानं स्वविकारोत्थदेहस्याभ्यन्तरे सदा।<br>अज्ञानकार्यं दुःखं च मोहस्नेहादिकं श्रुतिः॥106॥ |
| स्मृतिश्चतत्र नेत्याह कार्याभावे  च कारणम्।<br>तस्मिन्नंशे नेति युक्त्या सिद्धमेव विवेकिनाम्॥107॥ |
| मायां व्युदस्येति वाक् च विशेषोत्कर्षवाचिना।<br>उपसर्गद्वयेनाङ्घ्रियुगेनेवांशतो हरेः॥108॥ |
| दूरीचकार ते मायां हृद्गोप्यंशस्तदीदृशः।<br>तच्छक्त्या चेत्तर्ह्यणुश्च ब्रह्मांशः शक्तितो महान्॥109॥ |
| एवं च तद्गृहीतांशो ब्रह्मणोअशंः कथं भवेत्।<br>तस्मादज्ञानशक्त्यैव जीवोऽभूद्ब्रह्मणो बहिः॥110॥ |
| हन्ताज्ञानैकशरणस्तेनैव त्वं हतोऽस्यहो।<br>अतः स्वभावसंसिद्धभेदयोर्भिन्नधर्मिणोः॥111॥ |
| चिन्मात्रयोर्द्विता चेयं वाङ्मात्रेण न गच्छति।<br>एवं च द्वासुपर्णेति श्रुत्या युक्त्याबलीयसी॥112॥ |

द्विता भवन्महावाक्यशतानि च रमापतेः।

महत्वबोधकं चक्रे स्थिरीचक्रे जगत्रयम्॥ 113॥

अतस्तव महावाक्य सर्वं भेदस्य साधकम्।

बलादभूदन्यथैक्यकथेयं स्याद्वृथैव ते॥ 114॥

मुण्डितैक्यस्य हि ज्ञानं ब्रह्मसम्बन्धवर्जनात्।

ब्रह्मप्रमात्वरहितं न हितं ते करिष्यति॥ 115॥

अतस्तवैक्यमफलं सफलीकुर्वतोश्रितोः।

द्वितेयमुपजीव्यत्वादभूदतिबलीयसी॥ 116॥

उपजीव्यामिमां हन्तुं नोपजीवकमर्हति।

मिथस्त्वतिविरुद्धेऽर्थे द्वितेयं बलवत्तरा॥ 117॥

अत्यन्तभेदव्याप्तत्वाद्विक्करोति यदेकतात्।

सादृश्यैक्याय राज्यं तदृत्वैक्यं तद्विताार्दितम्॥ 118॥

आरण्यकं परित्यज्यं सनामारण्यकं ययो॥ 119॥

श्री॥ इति श्रीमद्वादिराजपूज्यचरणविरचितायां न्यायरत्नावल्यां तृतीयः सरः॥ श्री॥ 3-119॥

## चतुर्थः सरः ॥4-132॥

अद्वितीयश्रुतेः सत्वान्नैको जीवोऽपि सिद्ध्यति।

स्वेष्टसंरक्षणायास्याः सङ्कोचेऽन्येष्टगुप्तये॥ 1॥

| |
|---|
| जगच्च नाक्षिपेत्किन्तु तस्यासदृशतां वदेत्। <br> त्वमित्युक्तः श्वेतकेतुर्नैकजीवो मते तव॥2॥ |
| अज्ञान मूलः संसारो न ह्यस्य ज्ञानिनो भवेत्। <br> तेनैकजीवमतिनाममतेयं श्रुतिर्ध्रुवा॥3॥ |
| एकस्यैक्योक्तितश्चेयं बहुजीवैक्यवाक्क न। <br> एकजीवस्य साम्येन बहूनामेकता यदि॥4॥ |
| एकत्वेनानुक्तसुबहुजीवानां प्रबलत्वतः। <br> अयं च तद्वदेवान्यो वाक्यं चान्यार्थतामियात्॥5॥ |
| अनुग्रहं यद्बहूनां न्याय्यमाहुर्मनीषिणः। <br> अनूचानत्वाभिमानादहं ब्रह्मेति दुर्धिया॥6॥ |
| स्तब्धस्य ज्ञानदानाय तत्वमित्याह तं प्रति। <br> इति स्याद्गतिरस्माकं प्राक्काहं मानिनां प्रति॥7॥ |
| त्वं ब्रह्मेति तु वादस्ते पौनरुक्त्यान्न शोभते। <br> किन्तु त्वमेव तन्नासि सर्वे जीवाश्च तत्त्विति॥8॥ |
| वदेद्गुरुः सर्वमते सर्वैक्यमपि सम्प्रति। <br> उपदेष्टुं यतः पूर्वाऽज्ञातमेव वदेत् बुधः॥9॥ |
| अवश्यवक्तव्यतत्वस्यास्यानुक्तिः कथं वद। <br> अहं ब्रह्मेत्यादिवाक्क पूर्वश्रुत्युक्तवर्त्मना॥10॥ |

नैकजीवमतेऽप्यासीद्बहुजीवमतेपि न।

अतस्तवायुधं सर्वं पश्यायुधमभून्मम॥11॥

नैतदिच्छन्ति पुरुषमेकमित्यपि भारते।

यद्वचस्तच्च हि स्पष्टं चेतनेष्वेकतां क्षिपेत्॥12॥

यतो वाचो निवर्तन्त इति श्रुत्या श्रुतेर्बहिः।

यदि ब्रह्म करोषि त्वं व्याहतिस्त्वां तदाग्रसीत्॥13॥

वाग्रूपं तव शास्त्रं च निवृत्तं ब्रह्मणो भवेत्।

तवापि च सभामध्यान्निवृत्तिः स्याद्विवेकिनाम्॥14॥

यस्मान्निवृत्तिशब्दस्त्वं वक्ति वाचामगोचरम्।

अर्धप्रवृत्तिरूपा तल्लक्षणापि न सिद्ध्यति॥15॥

निवृत्तेरवधिङ्गस्यै यत्पदं वक्ति तं यदि।

तर्हि तं मुख्यतो वक्ति मुख्याभावे हि लक्षणा॥16॥

वृथा प्रथममुल्लङ्घ्य द्वितीयं कः समाश्रयेत्।

अयं निवृत्तिशब्दस्तु वृत्तिद्वयनिवारकः॥17॥

अगत्या याचमानस्त्वं दरिद्रं केन याचसे।

किं चेदं सर्वनामत्वाद्यत्पदं सर्ववाचकम्॥18॥

अस्य लक्षणतापक्षस्तेऽव्युत्पत्तेर्हि लक्षकः।

अगत्येदृक्पदं तस्य वाचकं चेन्निगद्यते॥19॥

तदसाधारणं नामाप्यगत्या तस्यवाचकम्।

नहि गङ्गापदं गङ्गाप्रवाहस्यापि लक्षकम्॥20॥

यस्य वाच्यान्तरं नास्ति तस्य वाच्यं तदेव हि।

वाच्यहीनश्चशब्दो नेत्यगतिर्नास्ति किं मम॥21॥

मनसा सह पाठेन वाग्वागिन्द्रियमस्त्वियम्।

इन्द्रियागोचरत्वं च स्यादेवास्मिन्नतीन्द्रिये॥22॥

साक्षादतीन्द्रियस्यापि पारोक्ष्येणास्ति वेदना।

अतो मनो मिनोत्वस्य वाक्यस्यार्थं तवोचितम्॥23॥

ब्रह्मौपनिषदं भूयात्समस्ताम्नायगोचरम्।

अतः प्राकृतवागादि त्वत्र नेत्याह वागियम्॥24॥

नितरामुपसीदन्ती विद्या ह्युपनिषन्मता।

सा चोपसर्गसामर्थ्यान्मुख्यतो वक्ति तं प्रभुम्॥25॥

मां विधत्तेऽभिधत्ते मामित्याद्यां च स्मृतिं स्मर।

दुराग्रहं परित्यज्य भज पदाम्बुजं हरेः॥26॥

न चेदविद्ययान्धस्त्वमन्धे तमसि मज्जसि।

सत्यज्ञानानन्तपदैर्लक्ष्यं चेद्ब्रह्म तद्बलात्॥27॥

अज्ञानं चाप्यसत्यं च परिच्छिन्नं च तद्ध्यभूत्।

अगाङ्गैव यथा तीरं गङ्गाशब्देन लक्षितम्॥28॥

| |
|---|
| यथा वा सिंहशब्दस्य मुख्यार्थः सिंह एव हि।<br>सत्यं ज्ञानमनन्तं च ब्रह्मणोऽन्यद्भवेद्बलात्॥29॥ |
| शक्तं पदं यतः प्राहुस्तन्मुख्यार्थयुतं च तत्।<br>मुख्यार्थश्च न ते ब्रह्म यल्लक्ष्यमिति ते मतम्॥30॥ |
| अतस्तत्पदमुख्यार्थाः कथं न स्युर्हि तादृशाः।<br>लक्ष्यार्थव्यतिरेकैव यथा स्वपदबोधिता॥31॥ |
| गङ्गैव गङ्गा सिंहश्च यथान्यः स्वपदोदितः।<br>अतस्ते लक्षणा सेयं स्वोक्तस्यार्थस्य शिक्षणम्॥32॥ |
| कुरुते परसिद्धान्तरक्षणं च करोत्यहो।<br>यल्लक्ष्यनिर्गुणादन्यस्सगुणस्तत्पदोदितः॥33॥ |
| सत्योऽभूज्ज्ञानगम्योऽभूदनन्तोभूच्छ्रियः पतिः।<br>असङ्गश्रुतिसङ्गेन ब्रह्मासङ्गं हि यो वदेत्॥34॥ |
| सोऽपि विद्वत्सङ्गशून्यो व्याहत्या सङ्गवान्परः।<br>किञ्चाऽसङ्गश्रुतेर्ब्रह्म सर्वसङ्गोज्झितं यदि॥35॥ |
| लक्ष्यालक्ष्यकृतासङ्गोप्यस्य नेति हतोऽस्यहो।<br>बोध्यभोधकतायोगादैक्यासिद्धिश्च ते भवेत्॥36॥ |
| अधिष्ठानाध्यस्तभावयोगादासीज्जगच्चसत्।<br>अज्ञानासङ्गि ते ब्रह्म  ज्ञानासङ्गि च यच्छ्रुतेः॥37॥ |

| |
|---|
| तद्ब्रह्मनिष्ठाज्ञानस्य नोपदेयमभूज्जगत्।<br>तज्ज्ञानबाध्यताचास्य त्वन्न्यायादेव नो भवेत्॥38॥ |
| व्यावहारिकसङ्गेन निर्वाहः क्रियते यदि।<br>तर्ह्यसङ्गश्रुतिः स्वार्थसङ्कोचात्कुपिता सती॥39॥ |
| दृग्दृश्ययोगायोगाख्यं प्रत्याख्याति मतं तव।<br>किञ्चाश्वत्वगजत्वाद्यैर्व्यावहारिकसङ्गवान्॥40॥ |
| अश्वादिस्तदसङ्गीति केन वा कथ्यते भुवि।<br>अतोऽसङ्गश्रुतेर्ब्रह्म नाभूदर्थो न चापरः॥41॥ |
| पारमार्थिकसङ्गस्याप्यभावोऽर्थस्तवैव हि।<br>नाभूत्तवमते लोकरीत्यातः कुपिता श्रुतिः॥42॥ |
| तमेव सङ्गं धिक्कृत्य निराचक्रे मतं तव।<br>सत्यः सङ्गोऽत्र नेत्यर्थो यद्युच्येत श्रुतेस्तदा॥43॥ |
| मिथ्यासङ्गोऽत्र नेत्यर्थमुक्त्वान्योऽपि सुखी भवेत्।<br>व्यावहारिकसङ्गोपि ब्रह्मासङ्गं भवेद्यदि॥44॥ |
| वेश्यासङ्गोप्यसङ्गः स्यात् स्तुत्यः स्यात्तर्हि लम्पटः।<br>किञ्च पुण्येन पापेन गुणेनाप्यगुणेन वा॥45॥ |
| यत्सङ्गि लोके तत्सर्वं व्यावहारिकसङ्गतः।<br>सङ्गितेनैव दूष्यं च पोष्यं च किलते मते॥46॥ |

अत ईदृग्विधं सङ्गमङ्गीकृत्य श्रुतिस्तव।
ब्रह्म दूष्यं विधायान्तेपारमार्थिकसङ्गतः॥47॥

नृश्रृङ्गाभात्तु रहितं वदेच्चेत्किं फलं ततः।
दूष्यार्थेंपि स नास्त्येव को विशेषः प्रभोरभूत्॥48॥

अतश्च ब्रह्मणि जगद्वैलक्षण्याय लोकगम्।
सङ्गं निवारयेत्तत्ते मतं सर्वं च नाशयेत्॥49॥

स्वयं श्रुतित्वाच्छ्रीदेवीरूपा श्रीवत्सधारिणः।
सदापि सङ्गिनी तस्मिंस्तत्सङ्गस्थापनोत्सुका॥50॥

अर्थान्तरमतिं चक्रे यत्सज्जनमनःप्रियम्।
सङ्गः सर्वात्मना त्याज्य इत्यादाविव तच्छ्रुतिः॥51॥

दुःसङ्गवर्जनादेव तव (वा)सङ्गं वदाम्यहम्।
इति मत्वा तत्ववादिमताचार्यस्य यन्मतम्॥52॥

तदेव स्वमतं भूयादित्यन्यमतमत्यजत्।
चित्वं च निष्क्रियत्वं च मिथो व्याहतमेव हि॥53॥

यतो ज्ञानक्रियां चापि क्रियामाहुर्विपश्चितः।
यदि भिन्न क्रिया नास्ति परिस्पन्दक्रियापि वा॥54॥

तर्हि सङ्कुचितार्था वाक् क्षिपेद्ब्रह्माणि दुष्क्रियाम्।
यथा ज्ञानक्रिया ब्राह्मी तद्रूपेति निगद्यते॥55॥

| |
|---|
| परिस्पन्दक्रिया चैशी तद्रूपैवास्तु का क्षतिः।<br>स्वाभाविकी ज्ञानबलक्रिया चेत्यस्ति हि श्रुतिः॥56॥ |
| स्वरूपभृता ते ज्ञानक्रिया विश्वभ्रमं यथा।<br>कुरुते तद्वदेवेयं क्रिया कुर्याद्गतागतम्॥57॥ |
| अणोरणीयसि हरौ परिस्पन्दक्रियासि चेत्।<br>अस्तु नो चेदवतरेत् भुवो भारं च को हरेत्॥58॥ |
| महत्त्वशक्त्या सर्वत्र स्थितोप्यस्तु स एव हि।<br>योह्यर्जुनस्य सूतः प्राग्विश्वरूपोप्यसौ न किम्॥59॥ |
| स्थविरस्य शिशोः पङ्गोर्या ह्यशक्तिर्गतागते।<br>सा बाहुप्याज्जवेनैव शक्तता वा गतागते॥60॥ |
| दुर्लङ्घ्याब्धिं गतो लङ्कां लीलया पुनरागतः।<br>हनूमान्वा सुरैः श्लाघ्यस्तदन्ये वा कपीश्वराः॥61॥ |
| तस्मान्महाप्रभोरस्य परिस्पन्देष्यशक्तताम्।<br>कुणपस्येव को ब्रूते मह्युद्धरणकर्मणः॥62॥ |
| अशरीरश्रुतिश्चास्य भिन्नदेहं प्रतिक्षिपेत्।<br>स्वरूपभूतदेहस्य कथं सा बाधिका वद॥63॥ |
| षष्ठ्यर्थदेहसम्बन्धस्याभावो हि श्रुतेर्मतः।<br>स्वरूपभूतः सम्बन्धायोग्यो देहोऽस्तु का क्षतिः॥64॥ |

| |
|---|
| देहोऽस्य नेति वाग्देहे क्षिपेद्देहान्तरं परम्।<br>तस्य देहस्य सा वाणी साधिका भाधिकापि न॥65॥ |
| मूर्धानं यदि वाग्वक्ति पृथिव्याश्चारतिं श्रुतिः।<br>सा वाग्देहाप्तितः किं न स्पष्टमाचष्ट तं प्रभुम्॥66॥ |
| द्युसम्बन्धी च यो मूर्धापादो यो भूस्थितो महान्।<br>स एवाग्निः कविः सम्राडित्यर्थौ यच्छ्रुतेरभूत्॥67॥ |
| अतो देहात्मको देवः कथं नाभूद्विचारय।<br>यन्मूर्ध्नो ग्रहणं चक्रे पादस्य च ततः श्रुतिः॥68॥ |
| प्रत्याहारस्य रीत्यैन सर्वदेहात्मकं जगौ।<br>मध्यस्थाकाशभागस्था या जङ्घा ये च जानुनी॥69॥ |
| यावूरू या कटिः कुक्षिर्यन्मध्यं यदुरस्तथा।<br>ग्रीवा च वदनं चैव स एवाग्निरिति स्फुटम्॥70॥ |
| अर्थः समाख्यया सिद्ध्येत्तं देहं का रुणद्धि वाक्।<br>अतः श्रुत्यर्थकथकास्त एवेति मतिर्मम॥71॥ |
| येषां शब्दार्थकुशलो गुरुः स्याद्भारतीपतिः।<br>सहि वेदव्यासशिष्यस्तत्पोष्यश्रुतिभाष्यकृत्॥72॥ |
| यदिचाद्वैतवाक्यानि सर्वाद्वैतं वदन्ति ते।<br>तदा मिथ्यात्ववाक्यानि बहिरासन्मतात्तव॥73॥ |

| |
|---|
| यदि मिथ्यात्ववाक्यानि सर्वमिथ्यात्वसूचिरे।<br>तदात्वद्वैतवाक्यानि बहिरासन्मतात्तव॥74॥ |
| सत्यमिथ्यार्थयोरैक्यं स त्वयापि न कथ्यते।<br>वाक्यद्वयेन यद्यर्थसङ्कोचः क्रियते त्वया॥75॥ |
| स्वार्थाख्यतृणसङ्कोचे गोद्वयं च प्रदुष्यति।<br>मिथ्यात्ववाचि चैतन्यात्सङ्कोचः किलते मतः॥76॥ |
| अद्वैतवाक्ये च जडात्सङ्कोचोऽभिमतस्तव।<br>किमिदं पदसत्वात्स्यात्किं वा स्वमतभत्वतः॥77॥ |
| नाद्यस्तादृक्पदाभावान्नान्त्यो निर्हेतुकत्वतः।<br>प्रमाणानां हि सत्वेनमतसत्वंभवेद्भुवि॥78॥ |
| तदभावे तु भुजयोः सत्वं कुत्रोपयुज्यते।<br>उक्तार्थवाचकपदाभावान्नेदमभूत्तव॥79॥ |
| अन्यत्तु मानं नैवास्ति यत्त्वदुक्तार्थसाधकम्।<br>किं च स्वमतरक्षायै सङ्कोचो यद्युदीर्यते॥80॥ |
| बहुशिष्टमतं त्रातुं सङ्कोचोऽन्योप्युदीर्यताम्।<br>यत्ते मिथ्यात्ववाक्तस्यां सङ्कोचोऽस्तु चराचरात्॥81॥ |
| श्रुत्या दूष्योगोतमोऽस्तु भास्करो वा प्रभाकरः।<br>ऐक्यवाक्ये जडाज्जीवात्सङ्कोचोऽस्तु हरेर्गुणाः॥82॥ |

| |
|---|
| अवताराश्चवयवाः प्रतिपाद्या भवन्तु च।<br>गौरियं गोपमन्वेति न तु गोघ्नं पदे पदे॥83॥ |
| विश्वं मिथ्या यदितदाभेदः सत्योऽभवन्मम।<br>सत्यमिथ्यार्थयोर्भेदो यत्तवापिमते मतः॥84॥ |
| भेदो मिथ्या तदैव स्याद्भेदिनोरेकता यदि।<br>अन्योन्याभाव एवायं भेदस्तादात्म्यमस्यच॥85॥ |
| प्रतियोगि त्रिकालेषु निषेधश्चभवन्मते।<br>मिथ्यात्वं यो ह्यभावस्य निषेधो भावएव सः॥86॥ |
| विश्वं सत्यं यदि तदा भेदः सत्यं भवेन्मम।<br>विश्वान्तःपातिभेदस्य यत्सत्ता च बलादभूत्॥87॥ |
| सदद्वैतं जगन्मिथ्यात्वमतं सन्त्यजन्द्विधा।<br>अपसिद्धान्तदोषेण दोषी स्यादिति चाधिकम्॥88॥ |
| किं चैक्यं ब्रह्मजडयोस्तवापि न ममापि न।<br>अतः प्रागुक्तयुक्त्या तद्भेदः सत्योऽभवन्न किम्॥89॥ |
| मिथ्यात्वं यदिसत्यं स्यात्सदद्वैतमतं गतम्।<br>अभावद्वैतवादेपि सदद्वैतमतच्युतेः॥90॥ |
| मिथ्यात्वं यदि मिथ्या स्यात्सदद्वैतमतं गतम्।<br>ब्रह्मवज्जगतोप्यस्यसत्यत्वावश्यकत्वतः॥91॥ |

| |
|---|
| वाक्यार्थो यदि चिन्मात्रं सर्वे वादा बहिर्गताः।<br>वाक्यार्थो यद्यचिन्मात्रं खण्डिता तर्ह्यखण्डता॥92॥ |
| अस्ति चेन्निर्गुणत्वं ते निर्गुणत्वं बहिर्गतम्। |
| नास्ति चेन्निर्गुणत्वं ते निर्गुणत्वं बहिर्गतम्॥93॥ |
| अवाच्यपदवाच्यत्वे बहिरासीदवाच्यता।<br>तत्पदेनाप्यवाच्यत्वे बहिरासीदवाच्यत॥94॥ |
| मुख्यार्थबाधे स्यादन्या वृत्तिर्गौण्यादिरूपिणी।<br>मुख्यार्थावाच्यताबाधे यद्वाच्यत्वदृढीकृतिः॥95॥ |
| वाचा दृष्टार्थबाधे स्याल्लक्षणाया बहिष्कृतिः।<br>वाचा दृष्टेरबाधे स्याल्लक्षणाया बहिष्कृति॥96॥ |
| जगत्कर्तुरपेक्षायां क्रिया स्याच्चिति सङ्गता।<br>तत्कर्तृनिरपेक्षायां क्रिया स्याच्चिति सङ्गता॥97॥ |
| शवोऽपि ह्यभवत्सा ते क्रिया कर्त्रनपेक्षिणी।<br>मायाविशिष्टकर्तृत्ववादो नो दोषकृन्मम॥98॥ |
| मायया कुर्वतोऽस्यास्यां करणे यत्रकर्तृता।<br>असङ्गत्वश्रुतेर्ब्रह्म यदि सङ्गविवर्जितम्॥99॥ |
| श्रुतिसङ्गेऽसङ्गिता न तदसङ्गेप्यसङ्गि न।<br>निर्गुणत्वश्रुतेर्ब्रह्म यदि धर्मविवर्जितम्॥100॥ |

| |
|---|
| श्रुत्या श्रुतत्वे धर्म्यासीत्तदभावेपि धर्म्यभूत्।<br>यतो वाचो निवर्तन्त इत्युक्तेर्यद्यशब्दता॥101॥ |
| यच्छब्दे शब्दता नाभून्नोचेन्नाभृदशब्दता।<br>एकत्वाद्भेदशून्यंचेद्ब्रह्म कारणता गता॥102॥ |
| एकत्वरूपं ब्रह्मैव यद्धेतूक्रियते त्वया।<br>हेतोरभावे साध्यस्याभावाद्भेद्यभवद्बलात्॥103॥ |
| यद्यसन्न तदा ब्रह्म तद्भेदवदभूद्बलात्।<br>न चेद्विशेषणं व्यर्थमनिर्वाच्यत्वलक्षणे॥104॥ |
| असत्ता ब्रह्मगैव स्यात्तवाप्यन्ते भवेद्धि सा।<br>स्थूलताराारुन्धतीति शाखाग्रं चन्द्रमा इति॥105॥ |
| न कोप्युपदिशेल्लोके यदि स्याद्देशिनीदृशी।<br>तर्हि तत्र कृता दृष्टिः स्थूलयोश्चतयोर्द्वयोः॥106॥ |
| दर्शनादेव सन्तुष्टा तत्रान्यं नहि द्रक्ष्यति।<br>निवर्तेत ततः शीघ्रं कृतकार्या यथा पुरात्॥107॥ |
| अपि तु स्थूलतारायाः समीपेऽस्यास्त्वणीयसी।<br>सा तारारुन्धती शाखाग्रस्य मार्गेण चन्द्रमाः॥108॥ |
| अस्तीत्युपदिशन्त्यार्याः द्वितीयाचन्द्रदृष्टये।<br>अरुन्धतीदृष्टये च नो चेद्दृक्स्यान्न सूक्ष्मयोः॥109॥ |

| |
|---|
| तदङ्घ्रना गता दृष्टिर्यतमाना शनैः शनैः। |
| अतिसूक्ष्मे च ते पश्येदिति सर्वस्य सम्मतम्॥110॥ |
| अतो मिथ्योपास्तितश्चसगुणोपास्तितश्च ते।<br>सत्यनिर्गुणदृक्स्यादित्यत्र नेदं निदर्शनम्॥111॥ |
| किं च भेदोपासनया भिन्नवस्त्वन्तरेक्षणात्।<br>तवैक्यमेव मिथ्या स्याद्भेदःसत्योऽभवन्मम॥112॥ |
| स्थूलैवारुन्धतीत्युक्ते शाखा चन्द्र इतीरते।<br>ऐक्यस्यैवोपदेशोऽभूत्तस्यैव स्यादुपासना॥113॥ |
| भेदोपास्तिरभीष्टा ते दृष्टान्तस्त्वैक्यगर्भितः।<br>अतोऽपि नायं दृष्टान्तस्त्वदिष्टार्थस्य साधक॥114॥ |
| चान्द्री कला च यत्सूक्ष्मतारा च महसाणुना।<br>युक्ता चन्द्रत्वतारात्वजात्या धर्मान्तरैरपि॥115॥ |
| अतो दृश्यं च तद्वस्तु सगुणं न तु निर्गुणम्।<br>तस्मात्वच्छास्त्रदृष्टार्थस्यान्तः स्यान्नाश एव हि॥116॥ |
| अस्माकं लोकसम्मत्या कथ्यमानं विवेकिभिः।<br>दृष्टान्तद्वयमप्येतत्स्यादिष्टार्थस्य साधकम्॥117॥ |
| श्रीश्च ब्रह्मादयश्चैव स्थूलतारोपमा मम।<br>राद्धान्ते ये न योगीन्द्रास्ते पश्येयुः पदे पदे॥118॥ |

| |
|---|
| परिवारतया तेषां पूजादिभिरुपासने।<br>कृते तन्मध्यपद्मस्थसूक्ष्मतारोपमा हरेः॥119॥ |
| अदृश्या मूर्तिरप्येषां कृपया दृश्यते शनैः।<br>नराणामपि ये दृश्याः शाखाग्रोपमिता भुवि॥120॥ |
| गुरवः सन्ति पन्थानस्ते च कृष्णस्य दृष्टये।<br>इत्थं दृष्टान्तयुगलं मर्त्यानां योगिनामपि॥121॥ |
| लब्धं यतस्त्वदुक्त्यैव तद्विषं चामृतायते।<br>अनुकूले जगन्नाथे हयग्रीवाभिधे प्रभौ॥122॥ |
| अरिर्मित्रं विषं पथ्यं भवेन्नास्त्यत्र संशयः।<br>ध्यायंश्च सगुणं यस्ते निर्गुणं द्रष्टुमिच्छति॥123॥ |
| मुक्तिं ध्यायन्स पापीयानन्धे तमसि पात्यते।<br>तस्मादुपास्यो दृश्यश्च गम्यश्च हरिरेव नः॥124॥ |
| किं च यत्सगुणं वस्तु तस्यैव तु पुनः पुनः।<br>ध्याने सति गुणापायान्निर्गुणं च तदेव च॥125॥ |
| विषमोयमुपन्यासाततोपि न समञ्जसः।<br>पुनः पुनश्च ध्यानेन तस्यैव स्याद्विनिर्णयः॥126॥ |
| ध्याने सति गुणापायः केन वा जायते वद।<br>किं ध्यानमसिधारा ते क्षुरधाराऽथवा भवेत्॥127॥ |

एवं भेदोपास्तितश्च भेदापाये कृते सति।
तदेव वस्त्वभिन्नं स्यादिति चात्यन्तदुर्घटम्॥128॥

तर्हि भिन्नकटाहस्य पुनः सन्धित्सया जनः।
कांस्यकारानुसरणं वृथैव कुरुते भुवि॥129॥

यदि तद्भिन्नशकलद्वन्द्वभेदपरम्परा।
तयोरभिन्नतां कुर्यान्मर्यादा तेऽन्यथा वृथा॥130॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः।
चतुर्थः सुधियां कण्ठालङ्कारं कुरुतेतराम्॥131॥

इति श्रीमद्वादिराजपूज्यचरणविरचितायां न्यायरत्नावल्यां चतुर्थः सरः॥4-132॥

## पञ्चमःसरः ॥5-100॥

यः पटादुद्धृतस्तन्तुस्तस्य तत्रैकता पुनः।
भवेत्केनाप्युपायेनयस्तन्तुर्यत्पटात्पुरा॥1॥

अनुद्धृतः पृथक् चास्ते कुविन्दगृह एव हि।
उपायशतकेनापि तस्य तन्तोस्तदेकता॥2॥

क्रियते केन वा लोके तस्य सूचिकया बलात्।
प्रवेशे कारितेप्यस्मिन् योगः स्यान्नत्वभिन्नता॥3॥

मिलितैस्तन्तुभिर्नूत्नः क्रियेतापिपटोऽपरः।
पृथक्स्थितश्च यस्तन्तुः पृथगस्ति च यः पटः॥4॥

| |
|---|
| तयोरैक्यं कल्पशतैरपि कर्तुं न शक्यते।<br>एवं च ब्रह्मणा साकं पृथक्पृथगनादितः॥5॥ |
| ये जीवाः सन्त्यनन्ताश्च भेदानादित्ववादिनः।<br>तेषां च तस्य चैकत्वं ज्ञानसूचिकयापि न॥6॥ |
| निशिताग्रापि स तस्मिन्प्रवेशं कारयेत्परम्।<br>ब्रह्मैवाभिन्नवस्त्वेकं कुर्युश्चेज्जीवराशयः॥7॥ |
| अर्हेयुरेकतां नोचेत्स्याददृष्टस्य कल्पना।<br>एकीभूयपुरा शेते रूपावयवकर्मभिः॥8॥ |
| या मूर्तिः पद्मनाभाख्या कार्यार्थे साऽमरैस्तुता।<br>एकीभूतस्वरूपात्स्वादुत्थाप्यैकतमां तनुम्॥9॥ |
| कार्याणि कृत्वा तत्रैव पुनरेकीकरोति च।<br>दृष्टानुसारीसर्वेशोप्यर्वाचीनस्य का कथा॥10॥ |
| अतस्त्वत्प्रक्रिया सर्वा विक्रियेति मतिर्मम।<br>अनादिकालमारभ्यश्रवणाद्यैर्न मुक्तता॥11॥ |
| यदि तर्हि कथं मुक्तिर्भाविभिस्तैर्भविष्यति।<br>शतायुषामसङ्ख्यानां ब्रह्मणां हि दिने दिने॥12॥ |
| असङ्ख्यश्रवणाद्यं च यथा पूर्वं श्रुतेरभूत्।<br>शतातीतयुगे वक्ति किं वक्ष्यतियुगान्तरे॥13॥ |

| |
|---|
| अद्याप्यफलवृक्षस्य किं स्यात्कालान्तरेफलम्।<br>परान्तरकालेपि मुक्तिर्नाभूत्किल भवन्मते॥ 14॥ |
| परान्तकालादपरो मुक्तिकालोऽस्तिकः श्रुतौ।<br>यस्तु ब्रह्मलये न स्यात्स मोक्षः स्यात्कदा वद॥ 15॥ |
| अस्मादप्यधिकोप्यत्र मुक्तिः क्वासौ लयः श्रुतः।<br>यदि शब्दश्रवणतोप्यर्थेप्यस्त्यपरोक्षधीः॥ 16॥ |
| गुडस्य स्वादुतां श्रुण्वन्कुतो नास्वादयेद्रसम्।<br>काशीद्रष्टरि यां पूजां कुरुते सकलो जनः॥ 17॥ |
| तच्छब्दश्रोतरि तथा कुतः पूजां न कुर्वते।<br>यद्युन्मीलितनेत्राणां घटाद्यर्थस्यदर्शनम्॥ 18॥ |
| तथा निमीलिताक्षाणां तच्छब्दश्रवणे सति।<br>दर्शनं तादृगस्तीति कोऽनुन्मत्तो वदेद्वद॥ 19॥ |
| चक्षूरोगी कुतो वैद्यं कारयेद्बहुवित्ततः।<br>शब्दादेवाखिल दृष्ट्वा तुष्टो रक्षेद्धि तद्धनम्॥ 20॥ |
| स्वयमेव यदि ब्रह्म स्वैक्यव्यक्तिश्चमुक्तता।<br>तर्ह्यार्चिरादिमार्गाणां चर्चा स्यात्कण्ठशोषणम्॥ 21॥ |
| अनादिकालमारभ्यभवेस्मिन्नेव मज्जतः।<br>उन्मज्जनाय यच्छास्त्रं तद्विकल्पामहं तव॥ 22॥ |

| |
|---|
| त्वद्भाष्यमूलसूत्राणां लुप्तवेदोद्धुतेश्च यः।<br>पुराणानां च सर्वेषां कर्ता सत्यवतीसुतः॥23॥ |
| अनन्तशास्त्रप्रभवः सर्वविद्याप्रवर्तकः।<br>सोयं तवैकजीवश्चेत्तर्हि शास्त्रमहार्णवम्॥24॥ |
| स्वतोन्यचिद्भावज्ञः कुतः कुर्यात्ससर्ववित्।<br>उन्मज्जेच्चनिमज्जेच्च कथं दुःखमहार्णवे॥25॥ |
| कथं च स्वकृतग्रन्थश्रवणं तस्य शोभते।<br>अतो मुक्तिश्च नास्यस्याच्छास्त्रं च स्यान्निरर्थकम्॥26॥ |
| यदि सर्वज्ञता न स्यात्तर्हि शास्त्रमहार्णवम्।<br>कथं कुर्यादल्पमतेर्नहि कार्यमिदं भवेत्॥27॥ |
| स्वग्रन्थमूलशास्त्रस्य कर्तुरल्पज्ञता यदि।<br>तर्ह्यभूत्तव शास्त्रस्य मर्यादान्धपरम्परा॥28॥ |
| अस्याज्ञतां च कश्छेतुं गुरुरस्ति जगत्त्रये।<br>यत्सूत्राज्जगतां ज्ञानं सोज्ञानी किलसूत्रकृत्॥29॥ |
| किं चास्याज्ञानविच्छित्त्यै शास्त्रं ज्ञानप्रदं कथम्।<br>स्वज्ञानजातशास्त्रार्थे नाज्ञानं स्वस्य युज्यते॥30॥ |
| ज्ञानार्थे श्रवणं व्यर्थं व्याख्यातास्य च कः पुमान्।<br>श्रोतव्यमन्यच्छास्त्रं नेत्याभीन्मुक्तेर्हि सङ्कटम्॥31॥ |

| |
|---|
| अतोऽपि मुक्तिर्नास्य स्यादेकजीवस्य ते मते।<br>यदि चायं नैकजीवस्तर्हि शास्त्रमहार्णवम्॥ 32॥ |
| कथं कुर्यात् स्तम्भकुम्भकुड्यकाष्ठसमो जडः।<br>अस्मिन्पक्षे च शास्त्रस्यैवाभावात्कस्यमुक्तता॥ 33॥ |
| यदि दृष्टस्यास्य शास्त्रस्यापहारो न युज्यते।<br>तदोपाहर कर्तारमस्य कञ्चन चेतनम्॥ 34॥ |
| त्वद्रीत्यैवकैजीवोऽस्य कर्ता नाभूत्ततोऽपरः।<br>कर्तास्य चेद्नोऽवश्यं वक्तव्यश्चेद्गतं मतम्॥ 35॥ |
| कल्पकं निर्गुणं ब्रह्म चिद्रूपं सम्मतं तव।<br>कल्प्यस्तवैको जीवश्च चिद्रूपोऽस्ति तवै(थै)व हि॥ 36॥ |
| एवं च सर्वशास्त्राणां कर्त्री सर्वज्ञचिद्यदि।<br>या च त्रिस्कन्धचैतन्यमासीद्विस्कन्धतां गता॥ 37॥ |
| अतः स्वकृतशास्त्राणामध्येतारो मुनीश्वराः।<br>प्रवक्तारश्च भाष्यादेः कर्तारश्च युगे युगे॥ 38॥ |
| बहवश्चेतनाः सिद्धास्तत्स्कन्धादेव केवलम्।<br>नच्छिन्नास्तव मूर्धा च छिन्नोभून्नात्र संशयः॥ 39॥ |
| एकजीवमते यस्मादुक्तेर्मुक्तिरभूत्परम्।<br>समस्तशास्त्रकर्तुश्च वक्तुश्च मुनिमम्डले॥ 40॥ |

| |
|---|
| यश्च सूत्रकृतोजाड्यं वक्त्यास्योक्तिं क्व संसदि।<br>बहुजीवमते चापि मुक्तिं युक्तिर्निकृन्तति॥ 41॥ |
| या जीवचिद्ब्रह्मचित्वमात्मज्ञानोदये सति।<br>सा पुनर्जीवचिद्ब्रह्म चितोऽन्या नास्ति ते मते॥ 42॥ |
| ब्रह्मचिच्छ सुखं दुःखं नानाजीवात्मना सदा।<br>भुङ्क्ते तस्मान्न सा मुक्ता ततोऽन्या चोक्तवर्त्मना॥ 43॥ |
| नास्त्येवातः स्वस्य दुःखभ्रान्त्य(न्ति)भावे न मुक्तता।<br>यस्य पादे वेदनाऽसौ कराभ्यां ताडयेदुरः॥ 44॥ |
| मुञ्चत्यश्रु च नेत्राभ्यां तदेकांशेपि वेदना।<br>सर्वांशवेदनैवाभूत्तस्मात्सर्वांशवेदना॥ 45॥ |
| एकांशः सुतरां दुःखानुभवं कुरुते ध्रुवम्।<br>सर्वज्ञं हि तव ब्रह्म महाभ्रान्तं भवेद्बलात्॥ 46॥ |
| न चेद्विश्वमभूत्सत्यं प्रमया वा भ्रमेण वा।<br>वाच्यं सर्वानुसन्धानं तेनात्यन्तैकतां गतः॥ 47॥ |
| मुक्तोपि तादृशो वाच्यो नो  चेत्तस्यैक्यमेव न।<br>अविद्यास्तमयात्तस्मिन्नंशेन भ्रान्तिरित्यपि॥ 48॥ |
| विरुद्धं भाषसे तत्र यद्यविद्याद्युपादिभिः।<br>कुतो भेदोऽस्ति तत्सत्वान्नांशान्तरसुखासुखे॥ 49॥ |

इति शङ्कावकाशोऽस्ति न चेदंशान्तरात्सुखात्।
ब्रह्मणः संसृतिरिव स्यादेवास्याश्च संसृतिः॥50॥

परिच्छिन्नांशगं दुःखं तत्तद्देहे तदिन्द्रियैः।
तैस्तैरेवानुभूतं च यथैक्यस्यानुभावतः॥51॥

स्वीयत्वेनानुसन्धत्ते देहान्तरविवर्जिता।
ब्राह्मी चिच्छाखिलं स्वेन साक्षिणाकेवलेन हि॥52॥

तयात्यन्तैकतां प्राप्ता मुक्तचिच्चैकताबलात्।
तत्सर्वमनुसन्दध्यान्नो चेदैक्यं प्रकुप्यति॥53॥

किमुत ब्रह्मचिन्निष्ठसंसारेणान्धसंसृतिः।
यथा स्वप्ने सुखं साक्षी देहाभावामपीक्षते॥54॥

तथा स्वाशगतं दुःखं चिदेवांशी निरीक्षताम्।
सर्वज्ञं किलते ब्रह्म स्वानंशांस्तैरभिन्नताम्॥55॥

दुःखं च तद्गतं पश्येन्न चेत्तत्संसरेत्कथम्।
ऐक्यभ्रमाद्देहधर्माध्यासोऽस्ति किल देहिनः॥56॥

ऐक्ये सत्यनुसन्धानं किं वाच्यं शोच्यमेव तत्।
यथा कायव्यूहसौख्यं तत्तद्देहेतदिन्द्रियैः॥57॥

तैरंशैरनुभूतं च योगी देहान्तरे स्थितः।
स्वीयत्वेनाऽनुसन्धत्ते साक्षिणैक्यबलात्परम्॥58॥

| |
|---|
| स्वाप्नदेहाख्योपाधिना कृतभेदेन भेद्यपि।<br>किं वाच्यमनुसन्धानं भेदमात्रोज्झितस्य तु॥59॥ |
| देहोऽन्यो विद्यमानोऽपि नास्योपकुरुते तदा।<br>किंत्वौपाधिकभेदस्य हेतुत्वादपकार्यपि॥60॥ |
| ऐक्यस्य बलतस्तूष्णीमासीन्नापचकार च।<br>अतो मुक्तचितो देहस्याभावोऽपि न बाधकः॥61॥ |
| देहान्तरोत्पन्नदुःखभोगेऽसौ साधकोऽपि न।<br>साक्ष्येव ह्यनुसन्धाता सर्वत्र सुखदुःखयोः॥62॥ |
| देहस्तज्जन्मनेऽथ्योंत्र तच्चदेहान्तरादभूत्। |
| स्वांशभोगं च योग्येव भुङ्क्ते स्वारब्धकर्मणः॥63॥ |
| फलं स्वस्य न चेत्स्यातां कृतहान्यकृतागमौ।<br>तस्मादंशगतं दुःखमंशिनोऽपि भवेद्ध्रुवम्॥64॥ |
| नचेत्पार्थसुखायेन्द्रः कुतः कृष्णमयाचत।<br>यद्व्यावहारिके भेदेसत्यप्यैक्यानुभावतः॥65॥ |
| योगी समनुसन्धत्ते तद्ब्रह्म ब्रह्मणोंशकः।<br>येग्यंशाश्च न्यायसाम्यात्सर्वे स्युरनुसन्धिनः॥66॥ |
| रज्जुभ्रमेऽपि यत्सर्पः सर्पकार्यं करोति तत्।<br>सत्यैक्यस्यपुरस्तात्ते मिथ्याभेदोऽप्रयोजकः॥67॥ |

| |
|---|
| व्यवहारिकभेदोऽपि यदि ज्ञानं विनाशयेत्।<br>तर्हि जीवं जडीकुर्याद्घटादिजडवस्तुवत्॥68॥ |
| यदि ज्ञानात्मकब्रह्मरूपे ज्ञानं न मोचयेत्।<br>ज्ञानात्मकानुसन्धानं कथं तर्हि बहिः क्षिपेत्॥69॥ |
| विश्लिष्टेपि स्वके पूर्वदेह एव स्थितोमुनिः।<br>विश्लिष्टनानादेहस्थस्वांशसौख्येनयत्सुखी॥70॥ |
| तस्मादुपाधिसंश्लेषविश्लेषौचाप्रयोजकौ।<br>गर्भाथोपाधिसुश्लेषात्किंवा फलमभूच्छिशोः॥71॥ |
| प्राग्भवीयस्य विश्लेषात्किं वा तस्य फलं गतम्।<br>अतोऽल्पदुःखजीवस्य बहुदुःखोपभुक्तये॥72॥ |
| ऐक्यज्ञानमभूद्धेतुर्न तु हातुं भवार्णवम्।<br>मुक्तौ चोभयतः पाशारज्जुस्तत्त्वां न मुञ्चति॥73॥ |
| एकजीवमते मुक्तिः साधनासम्भवाद्धता।<br>बहुजीवमते मुक्तिः साध्यस्यासम्भवाद्धता॥74॥ |
| यद्येकश्चेतनो मुक्तौ मुक्तेर्मुक्तिरभूत्तदा।<br>यद्यन्ये चेतनाश्चास्य मुक्तेर्मुक्तिरभूत्तव॥75॥ |
| यदेकाकी न रमत इति स्पष्टं श्रुतिर्जगौ।<br>यतश्चैकाकित्वमेव मुक्तिं वक्ति सदा भावान्॥76॥ |

| |
|---|
| स्वावेद्यत्वं यदि तदा मुक्तौ न सुखवेदना।<br>स्वावेद्यत्वं च मुक्तौ चेद्भवेत्ते चित्तवेदना॥77॥ |
| सुखस्य ज्ञानरूपत्वे न ते स्यान्मनसः फलम्।<br>सुखज्ञानस्वरूपत्वमात्रान्न मनसः फलम्॥78॥ |
| यद्यल्पयत्नवन्तोऽपि मुक्तौ स्युः फलतः समाः।<br>उच्चानां कृतहानिः स्यान्नीचानामकृतागमः॥79॥ |
| क्वचिच्च फलसाम्योक्तेरर्थौ दुःखातिदूरता।<br>स्वयोग्यसुखसम्प्राप्तिः पुनर्जन्मादिवर्जनम्॥80॥ |
| यस्माद्विस्मृतिशीलानामस्माकं च हरीच्छया।<br>अस्मिन्मायिमतेदोषा दृश्यन्ते स्म पदेपदे॥81॥ |
| तस्मादनन्तदोषौघदुःखताऽस्यैव युज्यते।<br>तथापि ग्रन्थविस्तारभयादेवोपरम्यते॥82॥ |
| बहुनात्र किमुक्तेन स्पष्टंभागवते स्थितम्।<br>कृष्णोद्धवाभ्यां कथितं श्लोकं श्लोकार्धमेव वा॥83॥ |
| विचारय मनः कृष्णे प्रचारय न मत्सरम्।<br>कुरु न्यक्कुरु सन्देहं पुरस्कुरु हरेर्मतम्॥84॥ |
| नित्यबद्धो नित्यमुक्त एकएवेति मे मतिः।<br>इत्युद्धवेन जीवस्यब्रह्मैक्ये शङ्किते सति॥85॥ |

| |
|---|
| अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते।<br>विरुद्धधर्मिणोस्तातस्थितयोरेकधर्मिणि॥86॥ |
| इति कृष्णः समाधाता गुरुस्त्रिजगतां गुरुः।<br>सयुक्तिकं भेदमेव समाधत्तेयतः प्रभुः॥87॥ |
| ततोयं माध्वराद्धान्तो रम्यो युक्तिशतैर्युतः।<br>श्रुतेः स्मृतेश्चानुकूलः सिद्धान्तोऽभून्न संशयः॥88॥ |
| जीवेशयोरैक्यपक्षः पूर्वपक्षोऽभवद्ध्रुवम्।<br>अतोऽपि त्वन्मतं हेयमिति सर्वं समञ्जसम्॥89॥ |
| अस्तु वस्त्वखिलं सत्यमस्तु सर्वोत्तमो हरिः।<br>अस्तु स्वस्ति समस्तस्यमास्तु विश्वस्य विप्लवः॥90॥ |
| पान्तु पुण्यानि सततं त्रान्तु तत्वानि तत्वतः।<br>यान्तु पापानि विलयं त्रान्तु देवाः सवा सवाः॥91॥ |
| नमोऽस्तु  कञ्जनेत्राय मञ्जुगात्राय तेऽञ्जसा।<br>नमोस्तु रम्यग्रीवाय हयग्रीवाय सर्वदा॥92॥ |
| नमोऽस्तु मध्वमुनयेसदासच्छास्त्रयोनये।<br>तदीयवाण्यै दुर्वादिकृपाण्यै च नमो नमः॥93॥ |
| सङ्गीतमङ्गलरवा तुङ्गापाङ्गतुरङ्गमा।<br>गङ्गाजनकपादाब्जभृङ्गी माङ्गीरवत्वियम्॥94॥ |

गुरवः श्रितदेवेन्द्र तरवः सत्वभीरवः।
घ्नान्तुपापानि सततं सन्तुसन्तोषदाश्च मे॥95॥

ग्रन्थेऽस्मिन्पवनःकर्ता तत्पत्नी शारदाम्बिका।
वाग्वैखरीप्रदा युक्तिसञ्चारगुणदा च मे॥96॥

नायकः सर्वजगतां नायकोऽत्र रमापतिः।
नायकी तत्पदाम्भोजसेवोत्सुकरता रमा॥97॥

भवतां जन्मसफलं भवतां भवतामिह।
ममापि जन्म सफलं यैरित्थं कीर्त्यतेहरिः॥98॥

वादिराजेन रचितां न्यायरत्नावलीमिमाम्।
सङ्गृह्णतः सभामध्ये वाग्दारिद्र्यं न विद्यते॥99॥

वादिराजार्जितन्यायरत्नावल्याः सरोऽमलः।
पञ्चमः सुधियां कण्ठालङ्कारं कुरुतेतराम्॥100॥

॥इति श्रीवादराज पूज्यचरणविरचितन्यायरत्नावल्यां पञ्चमः सरः समाप्तः॥5-100॥

॥ ग्रन्थश्चायं सम्पूर्णः ॥

॥मुख्यप्राणवशो सर्वं सविष्णोर्वशगः सदा॥

॥प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्दानम्॥